No. २८ / घ

Title लघुसिद्धान्तकौमुदी

Author वरदराज

Extent ६० पत्र Age

Subject व्याकरण



सिद्धान्त

लघुकौमुदी

२७

सं २



ॐ स्वस्ति श्रीगणेशाय नमः ॐ नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहं पाणिनीयप्रवेशाय लघु
ल कौ॰ सिद्धान्तकौमुदीम् १ अइउण् ऋलृक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झ
१ भञ् घढधष् जबगडदश् खफछठथचटतव् कपय् शषसर् हल् १४ इति माहेश्वरा
णि सूत्राण्यणादिसंज्ञार्थानि एषामन्त्या इतः हकारादिष्वकार उच्चारणार्थः लणमध्ये त्वित्संज्ञ
कः हलन्त्यं उपदेशेऽन्त्यं हलित्स्यात् उपदेश आद्योच्चारणं सूत्रेष्वदृष्टं पदं सूत्रान्तराद्
नुवर्तनीयं सर्वत्र अदर्शनं लोपः प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् तस्य लोपः तस्येतो लो
पः स्यात् णादयोऽणाद्यर्थाः आदिरन्त्येन सहेता अन्त्येनेता सहित आदिर्मध्यगानां स्व
स्य च संज्ञा स्यात् यथाऽणिति अइउवर्णानां संज्ञा एवमच् हल् अल् इत्यादयः ऊकालोऽ
ज्ह्रस्वदीर्घप्लुतः उ ऊ ऊ३ इव वः कालो यस्य सोऽच् क्रमाद्ध्रस्व दीर्घप्लुतसंज्ञा॥
स्यात् स प्रत्येकमुदात्तादिभेदेन त्रिधा उच्चैरुदात्तः ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्व
भागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् नीचैरनुदात्तः ताल्वादिषु सभागेषु स्थानेष्वधोभागे ... नि

ष्वतोऽनुदात्तसंज्ञः स्यात् समाहारः स्वरितः उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन्
सोऽच् स्वरितसंज्ञः स्यात् स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा मु
खनासिकावचनोऽनुनासिकः मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः।
स्यात् तदित्थं अइउऋ एषां प्रत्येकमष्टादश भेदाः ऌवर्णस्य द्वादश तस्य दीर्घाभावात् ॥
एचामपि द्वादश तेषां ह्रस्वाभावात् तुल्यास्यप्रयत्नं सवर्णं ताल्वादिस्थानमाभ्यन्तरप्रय
त्नश्चेत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ऋऌवर्णयोर्मिथः सावर्ण्यं।
वाच्यं अकुहविसर्जनीयानां कण्ठः इचुयशानां तालु ऋटुरषाणां मूर्धा ऌतुलसानां।
दन्ताः उपूपध्मानीयानामोष्ठौ ञमङणनानां नासिका च एदैतोः कण्ठतालु ओदौतोः कण्ठोष्ठं।
वकारस्य दन्तोष्ठं जिह्वामूलीयस्य जि ⌢ मूलं नासिकानुस्वारस्य अष्टौ स्थानानि वर्णानामु
रः कण्ठः शिरस्तथा जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च हकारं पंचमैर्युक्तमन्तस्थै स्था
भिः संयुतं उरस्यं तं विजानीयात् कण्ठमाहुरसंयुतं प्रयत्नो द्विधा आभ्यन्तरो बाह्यश्च आ

स्यः पञ्चधा स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् तत्र स्पृष्टं प्रयत्नं स्पर्शानां जिह्वाग्रादेस्ताल्वा
ल॰कौ॰ देः स्पर्शनेन स्पृष्टता मिथः ह्रयास्थितो विवृतासंवृतसमीपतः ईषत्स्पृष्टमन्तस्थानां ईषद्विवृतमू।
२ ष्मणां विवृतं स्वराणां ह्रस्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियादशायां तु विवृतमेव बाह्यप्रयत्नस्त्वेकाद
शधा विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति ख
रो विवाराः श्वासा अघोषाश्च हशः संवारा नादा घोषाश्च वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्प
प्राणा अन्ये महाप्राणा इत्यर्थः वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः कादयो मावसा।
नाः स्पर्शाः यणोऽन्तस्थाः शल ऊष्माणः अचः स्वराः ✗क ✗ख इति कखाभ्यां प्रागर्द्धविसर्गसदृशो
जिह्वामूलीयः ✗प ✗फ इति पफाभ्यां प्रागर्द्धविसर्गसदृशो उपध्मानीयः अं अः इत्यचः
परावनुस्वारविसर्गौ अणुदित्सवर्णस्य चाप्रत्ययः ॥१।१।६९ अवदीयमानोऽण् उदिच्च सवर्णा।
नां स्वसंज्ञा स्यात् अत्रैवाण् परेण णकारेण बोध्यः कु चु टु तु पु एते उदितः तदेवम् अ इत्यष्टादशा
नां संज्ञा स्यात् तथेकारोकारौ ऋकारस्त्रिंशतः संज्ञा एवं लृकारोऽपि एचो द्वादशानां अनुनासि
कानुनासिकभेदेन यवलानां द्वियोतेनानुनासिकास्तेन द्वयोर्द्वयोः संज्ञा परः सन्निकर्षः संहि

ता॥ १।४।१०९॥ वर्णानामतिशयितः सन्निधिः संहितासंज्ञास्यात् हलोनन्तराः संयोगः ॥१।१।७॥
अज्भिरव्यवहिताहलः संयोगसंज्ञाःस्युः सुप्तिङन्तंपदम् ॥१।४।१४॥ सुबन्तंतिङन्तंचपदसंज्ञं
स्यात् ~~इतिसंज्ञाप्रकरणम्~~

इकोयणचि ६।१।७७। इकःस्थानेयणस्यादचिसंहितायांविषये।
सुधीउपास्यइतिस्थिते तस्मिन्नितिनिर्दिष्टेपूर्वस्य॥१।१।६६ सप्तमीनिर्देशेनविधीयमानंका
र्य्यंवर्णान्तरेणाव्यवहितस्यपूर्वस्यबोध्यं स्थानेन्तरतमः॥१।१।५०॥ प्रसंगेसतिसदृशतमआदे
शःस्यात् सुध्य् उपास्यइतिस्थितेअनचिच ॥८।४।४७। अचःपरस्ययरोद्वेवास्तोनत्वचि झ
लांजशझशिइतिपूर्वधकारस्यदकारः संयोगान्तस्यलोपः ८।२।२३। संयोगान्तंयत्पदंतस्य।
लोपःस्यात् अलोन्त्यस्य ॥१।१।५२। षष्ठीनिर्दिष्टोन्त्यस्यादेशःस्यात् इतियलोपेप्राप्ते य
णःप्रतिषेधोवाच्यः अन्क्रीतपरेणासंयोज्यम् सुध्युपास्यः मद्ध्वरिः धात्त्रंशः लाकृतिः अचोरहा
भ्यांद्वे ॥८।४।४६। अचःपराभ्यांरेफहकाराभ्यांपरस्ययरोद्वेवास्तः हृष्यनुभवः नद्यत्ति प

ल.कौ.
८

चोयवायावः ॥६॥१।७८। एचः क्रमात् अय् अव् आय् आव् एते स्युरचि ॥ यथासंख्यमनुदेशः समा-
नाम् ॥१।३।१०॥ समसंबन्धी विधिर्यथासंख्यं स्यात् हरये विष्णवे नायकः पावकः
वान्तो यि प्रत्यये ॥६।१।७९। यादौ प्रत्यये परे ओदौतोरवावौ स्तः गव्यम् नाव्यम् ॥ क्षय्यज-
य्यौ शक्यार्थे ॥६॥१।८१। यान्तादेशनिपातनार्थमिदं क्षय्यं जय्यं शक्यार्थे किं क्षेयं
पापं जेयं मनः ॥ अध्वपरिमाणे च ॥ गोर्यूतौ इति शब्दे परे अध्वपरिमाणे वाच्ये अव्
स्यात् गव्यूतिः गोर्यूतौ छन्दसि स्यादिति व्याख्यानात् गव्यूतिः स्त्री क्रोशयुगं अदेङ् गुणः अदेङ् च गुण-
संज्ञा स्यात् तपरस्तत्कालस्य ॥१।१।७०। तपरस्तात्परश्चोच्चार्यमाणो वर्णः समकालस्यैव
संज्ञा स्यात् एकः पूर्वपरयोः ॥६।१।८४। इत्यधिकृत्य आद्गुणः ॥६।१।८७। अवर्णादचि परे
पूर्वपरयोरेको गुण आदेशः स्यात् संहितायां विषये उपेन्द्रः गङ्गोदकं । रमेशः उपदेशेऽजनुनासिक
इत् ॥१।३।२। उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् प्रतिज्ञानुनासिक्याः पाणिनीयाः लणसूत्रस्था-
वर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा उरण् रपरः ॥१।१।५१। ऋ इति त्रिंशतः संज्ञेत्युक्तं ॥
- स्थाने योऽण् स रपरः सन्नेव प्रवर्तते कृष्णर्द्धिः तवल्कारः तवल्कारः लोपः शाकल्यस्य

वर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे पूर्वत्रासिद्धम् ८।२।१। सपादसप्ताध्यायीं प्रति त्रिपा
द्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् ॥ हर इह ॥ हरयिह । विष्ण इह विष्णविह । वृ
द्धिरादैच् ।१।१।१ आदैच्च वृद्धिसंज्ञास्स्यात् वृद्धिरेचि ।६।१।८८। आदेचि परे वृद्धिरेकादेशः स्या
त् गुणापवादः कृष्णैकत्वं गङ्गौघः देवैश्वर्यं कृष्णौत्कण्ठ्यम् एत्येधत्यूठ्सु ॥ ६।१।८९। अव
र्णादेजाद्योरेत्येधत्योरूठि च परे पूर्वपरयोर्वृद्धिरेकादेशः स्यात् पररूपगुणापवादः उपैति उपैध
ते । प्रष्ठौहः एजाद्योः किं उपेतः मा भवान् प्रेदिधत् अक्षादूहिन्यामुपसंख्यानं अक्षौहिणी सेना । स्वा
दीरेरिणोः ॥ स्वैरं स्वैरी स्वैरिणी प्रादूहोढोढ्येषैष्येषु प्रौहः प्रौढः प्रौढिः प्रैषः प्रैष्यः ऋते च
तृतीयासमासे अवर्णात् ऋते परे तृतीयासमासे वाच्ये वृद्धिरेकादेशः स्यात् सुखेन ऋतः सुखार्
तः तृतीयेति किं परमर्तः प्रवत्सतरकम्बलवसनार्णदशानामृणे ॥ प्रार्णं । वत्सतरार्णं कम्बलार्णं
वसनार्णं दशार्णं ॥ उपसर्गाः क्रियायोगे । प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः प्र परा । अप । स
म् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप ॥ एते प्रा
दयः भूवादयो धातवः ।१।३।१ क्रियावाचि । नो भ्वादयो धातुसंज्ञाः स्युः ॥ उपसर्गादृति धातौ

सि॰ कौ॰ ४

अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् प्रार्छति उपार्छति ॥ एङि पररूपं । । ८९ । आद
पसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् प्रेजते उपोषति अचोंत्यादि टि ॥ १२१ ॥ अचां मध्ये ।
योन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् शकंध्वादिकृताचक्षितसंगिरणो विधिस्सः निम्मानिमो मिध्येनिम
विवक्षवान् क्ववदेषु पररूपं वाच्यम् तच्च टेः शकंधुः कर्कंधुः मनीषा पतञ्जलिः सीमन्तः केशवेशे ।
सीमान्तोन्यः सारंगः पशुपक्षिणोः साराङ्गोन्यः आकृतिगणोयं एवे चानियोगे अवर्णादेवशब्दे
परे पररूपमेकादेशः स्यात् अनियोगे वाक्येक्व भोक्ष्यसे अनियोगे किं तवैव ओ· ष्ठयोः समासे वा
स्थूलोतुः स्थूलोतुः बिंबोष्ठः बिंबौष्ठः समासे किं तवौष्ठः ओमाङोश्च अवर्णान्तादोमि आङि च परे
पररूपमेकादेशः स्यात् शिवायोंनमः शिवएहि शिवेहि अकः सवर्णे दीर्घः अकः सवर्णेऽचि परे ।
दीर्घ एकादेशः स्यात् दैत्यारिः श्रीशः विष्णूदयः होतृकारः एङः प्लुतादनिपदान्तादेङोति परे पूर्व
रूपमेकादेशः स्यात् हरेव विष्णोव सर्वत्र विभाषा गोः लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः प
दान्ते गो अग्रं गोग्रं एङन्तस्य किं चित्रग्वग्रं पदान्ते किं गोः अनेकाल्शित्सर्वस्य अनेकालादेशः शिच्च
सर्वस्य स्यात् इति प्राप्ते ङिच्च ङिदनेकालप्यन्तस्यैव स्यात् अवङ् स्फोटायनस्य ॥ पदान्ते एङन्तस्य ।

गोरकुवाचिगवाग्रं गोग्रं गोयं पदांतेतिकिंगवि इंद्रेचगोरवङ्गिद्गवेंद्रः विवक्षितविभाषयागवा
न्द्रः हराडूतेच हे रात्रेवोवनेयहाके नस्पदैः स्वतोवास्वतप्रग्रह्याः विनिस्ते । एतेविसकृतास्युः ।
आगरुकृस्यत्रगोऽग्रइति क्रस्वेस्वत्रुसेयोगेगुरू दीर्घेचगुरो शान्तोऽनंतस्याप्येकैकस्यासाचांहूरास्ते
वाधनेयहाकोतस्यस्वरटभिन्नास्यापिगुरोः स्वतोवास्यात् देवदत्तदेवदत्तदेवहता ः हेकिंवकारादि
कारस्यमाभूत् अन्तः किंकृत्स्न एकैकग्रहणंयर्थार्थं एहदेद्विवचनंप्रग्रह्यं इहूदेदेते द्विवचनंप्र
ग्रह्यंस्यात् हरीएतौ विष्णूइमौ गंगेअमू अरसोमात् अस्मात्पराबीहतौ प्रगृह्यसंज्ञौस्तः अमीईशा
रामकृष्णावम् आसातेमातकिंग्रमतिमात् ग्रहणेपकारोप्यनुवर्तते अमुकेत्र चादयोसत्वेलिंगसं
ख्याऽन्वितेद्रव्ये अदव्यार्थाश्चादयो निपातसंज्ञास्युः प्रादयः एते । पितथानिया संज्ञास्युः निपा ।
तएकाजनाङ् ।। एकाच्निपातआङ्वर्जः प्रगृह्यसंज्ञःस्यात् इइंद्रः उउमेशः अअनेनः अना
ऽत्के ङि दाकाराप्रगृह्यसंज्ञ एव ईषदर्थेक्रियायोगेमर्यादाभिविधौचयः एतमातंङितंविध्याद्धा ।
वाक्यस्मरणयोरङित् आएवंनुमन्यसे आएवंकिलतत् ईषउस्मम ओस्म ओत् ओदंतोनिपातः प्रगृह्यः
अहोईशाः संवुद्धौशाकल्यस्येतावनार्षे संवुद्धिनिमित्तकओकारोवाप्रगृह्यःस्यात् विष्णोइतिवि ।

न कौ॰
५

स्यविति विस्म इति ग्रनार्थे किं ब्रह्मसवेयविस्मब्रवीत् मयङ्गोवोवा मयापरस्यङ्गोवोवास्मात् ग्रचिकि
त्वङ्कं किन्त्वङ्कं वतस्याः सिद्धत्वात्तनानुस्वारः रकोसवर्णे शाकल्यस्य ह्रस्वश्च पदान्तात् रको ह्रस्वोवा
॰सवर्णे॰ चिद्रूपविधिसामर्थ्यान्न स्वरसंधिः चक्रि ग्रत्र चकारात्पदान्तात् किं गौर्यौ नसमासे वाप्यश्च
श्लकः श्लति परे पदान्तात् कः मागवत् वराङ्गषिवक्तार्षिः पदान्तात् किं ग्राढत् रम्यचसंधिः रस्तो
श्चुनाश्चुः स्तोस्सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः रामश्शेते रामश्चिनोति स।
च्चित् शात्। तन्पः स्तोशात् शात्परस्यात वर्गस्य श्चुत्वं न स्यात् विश्न वर्ग बनाने योगे ष्टुः स्यात् विस्व
प्रश्नः षटसंतः षट्तपदान्तां किं ईड्टेटोः किं सर्पिष्टमम् ग्रनामनवतिनगरीणामिति वाच्यम् षण्णां षण्ण
वतिषणगर्यः तोषि तवर्गस्य षकारे परे ष्टुत्वं न स्यात् सन्षष्ठः कलोञ्नमसोऽन्ते पदान्ते जलोञ्जशः स्युः
वागीशः विद्रूपं परेऽनुनासिके नुनासिको वा परा यदान्तस्यानुनासिके परे॰ तन्नसिको वा स्यात् एतन्मु
रारिः एतन्मुरारिर्मनस्ये भाषायां नित्यं तत् मात्रं चिन्मात्रं तोलि तवर्गस्य लकारे परे परसवर्णः त।
जपः विद्वाल्लिखति तस्यानुनासिको लः उदः स्थास्तंभोः पूर्वस्य उदः परयोः स्थास्तंभोः पूर्वसवर्णः त
स्मादित्युत्तरस्य पंचमनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयं आदेः पर॥

स्य परस्य पदादिस्थितेन तस्मादेवं जीयंत्र॰ घोषस्य महाप्राणस्य विवारस्य श्वासस्य समतामहशापव।
यकारः इतिसम्बन्धः कतोकरिसवर्णो हलः परस्य कतोवालोपः सवर्णोकरि इतिपदेथलोपः लो
पाभावपदेतत्र यसेवश्चवर्णोनत्वखरिवितिचर्त्वं चर्त्वंप्रतिषस्यासिद्धत्वात् खरिव खरिपरेफलो।
वरः स्यः इत्युदोदस्यतः उत्थाववउतेभत कयोदोमतरस्यांजयः परस्य हस्य वा इर्व सवर्णः सेवारस्य॥
नादस्य घोषस्य महाप्राणस्य हस्य तादृशो वर्गचतुर्थः ॰ः वागहरि शक्कोटि पदान्तात् कयः
परस्य शस्य छो वा दिपदान्तात् किं विरपर्शाद् तमभीतिवाच्यं तच्छ्लोकेन तत्श्लोकेन अप्सरे किंवा।
क॰ तति मोनुस्वारः मोतस्य पदस्यानुस्वारो हलि हविंदेव परस्येति किंगम्यते नश्चापदान्तस्य।
झलिः नस्य मस्य चापदान्तस्यानुस्वारो हलि हरिकलियशांसिश्चाक्रंसतेकलि किंगम्यते॥
अनुस्वारस्य यपि परसवर्णः अञ्चितः शान्तः कुंठितः उपदान्तस्य पदान्तस्यानुस्वारस्य यपि परे परस
वर्णो वा स्यात् तंकरोषि तं करोषि संयंतो संय्यंता संवत्सरः संवत्सरः यंल्लोकम् यल्लोकम्॥
अत्रानुस्वारस्य पदेतत्र नासिका यवलाः मोराजि समः कोकिवंतेराजधातौ परे समोमस्य मएव स
स्यात् हेमपरे वा मपरे हकारे यपरे मस्य मो वा स्यात् किंह्मलयति किम्ह्मलयति यवलपरे एव॥

त्वावा यवलपरे हकारे मस्य यवला वा स्युः किं॰ किंह्मः किंह्मलयति किंह्वलयति किंह्लादयति ॥
लेकौ किंल्ह्लादयति नपरे नः नपरे हकारे परे मस्य नः स्याद्वा किंह्नुते किंन्ह्नुते ग्राघ्नेतात्टकितो टिकितो
९ यस्तोक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः डः सि धुट् डात्परस्य सस्य धुड्वा षट्त्सन्तः षट्सन्तः ङ्णोः।
कुक्टुक्शरि ङकारणकारयोः कुक्टुकावागमौ स्तः शरि प्राङ्क्षष्ठः प्राङ्षष्ठः सुगण्ट्षष्ठः
सुगण्षष्ठः नश्च नकारान्तात्परस्य सस्य धुट् वा सन्त्सः सन्सः शि तुक् पदान्तस्य नस्य शे तुग्वा से
छंभुः सञ्शंभुः श॰॰भुः स॰॰ ङमो ह्रस्वादचि ङमुण्नित्यं ह्रस्वात्परो यो ङम् तदन्तं यत्पदं त
स्मात्परस्याचो ङमुडागमः स्यान्नित्यं प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युतः समः सुटि समो॰॰ स्यात्।
सुटि अत्रानुनासिकः पूर्वस्य तु वा अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा अननुनासिकात्परोऽनुस्वा
रः अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः खरवसानयोर्विसर्जनीयः खरि अवसा।
ने च पदान्तस्य रस्य विसर्गः संपुंकानां सो वक्तव्यः संस्कर्ता संस्कर्ता पुमः खय्यम्परे पुंस्कोकिलः प
रे अं परे खयि पुमो रुः नश्छव्यप्रशान् अम्परे छवि नान्तस्य पदस्य रुः विसर्जनीयस्य सः खरि॥
चक्रिंस्त्रायस्व चक्रिंस्त्रायस्व अप्रशानिति किं प्रशान्तनोति पदान्तस्येति किं हन्ति नॄन्पे नॄंस्पः

स्याद्धाप्यपरे कुः ःखौ ःके ःपौ चकवर्गे पवर्गे च परे विसर्गस्य ःकःः ओस्तक्ष्यादिसर्गः नॄन्पाहि नॄंः पाहि
नॄँ ःपाहि न्दँ ःपादि नँ ःपाहि सोपदादौ विसर्गस्य सः स्यादपदाद्योः कुप्वोः पयस्पाशम् यशस्क
ल्पम् यशस्कं यशस्काम्यति अनव्ययस्येति वाच्यम् प्रातःकल्पम् काम्ये रोरेवेति वाच्यम् नेह गीः
काम्यति इणः षः इणः परस्य विसर्गस्य षः कुप्वोः सर्पिष्पाशं सर्पिष्कल्पं सर्पिष्काम्यति कः स्का
दिषु च एष्विण उत्तरस्य विसर्गस्य षः स्यात् अन्यस्य तु सः कस्कः कौतस्कुतः सर्पिष्कुण्डिका धनुष्कपा
लमित्यादि आकृतिगणोऽयं तस्य परमाम्रेडितं द्विरुक्तस्य परमाम्रेडितं स्यात् कानाम्रेडिते का
न्नकारस्य रुः स्यादाम्रेडिते कांस्कान् कान्कान् छे च ह्रस्वस्य छे तुक् आङ्माङोश्च पदान्ताद्वा दीर्घात्पदान्ताच्छे
तुग्वा लक्ष्मीच्छाया लक्ष्मीछाया इति हल्सन्धिः विसर्जनीयस्य सः खरि विसर्गस्य सः वा शरि वि
विसर्गस्य विसर्गो वा हरिश्शेते हरिः शेते इति विसर्गसन्धिः स्वोतसमोऽदितिस्सप्रत्यये कृते रि
वस् अर्थ इति स्थिते ससजुषो रुः पदान्तस्य सस्य सजुषश्च रुः स्यात् अतो रोरप्लुतादप्लु
ते अप्लुतादतः परस्य रोरुः स्यादप्लुते शिवोऽर्च्यः हशि च तथा शिवो वन्द्यः भोभगो अघो अपू
र्वस्य योऽशि एतत्पूर्वस्य रोर्यादेशः अशि देवा इह देवायिह भोस् भगोस् अघोस् एतेषां निपाताः

ल॰कौ॰ तेषां हलेव कृते व्योर्लघुप्रयत्नतरः शाकटायनस्य पदांतयोर्वकारयकारयोर्लघूच्चारणौ वयौ
३ वा स्तोऽशि परे यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्ये स लघुप्रयत्नतरः ओतो गार्ग्य।
स्य पदांतस्यालघुप्रयत्नस्य यस्य नित्यं लोपः भो अच्युत भो अच्युत लघुप्रयत्नपक्षे भो यच्युत
हलि सर्वेषां भोभगोअघोअपूर्वस्य यलोपः स्याद्धलि सर्वेषां मते भो देवाः भगो नमस्ते अघो
याहि देवा यांति रोः सुपि अह्नो रेफादेशो न तु रुः सुपि अहरहः अहर्गणः सुपि किं अहोभ्यां।
रो रि रेफस्य रेफे परे लोपः ढ्रलोपे पूर्वस्य दीर्घोऽणः ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो
दीर्घः पुना रमते हरी रम्यः शंभू राजते अणः किं तृढः मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे
रो रीति लोपे च प्राप्ते विप्रतिषेधे परं कार्यं तुल्यबलविरोधे परं कार्यं स्यात् इति रो रीति लोपे
प्राप्ते पूर्वत्रासिद्धमिति रो रीत्यस्यासिद्धत्वादुत्वमेव मनोरथः एतत्तदोः सुलोपोऽकोरनञ्स
मासे हलि अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे एष विष्णुः स शंभुः
अकोः किं एषको रुद्रः अनञ्समासे किं असः शिवः हलि किं एषोऽत्र सोऽचि लोपे चेत्पादपूर
णं स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत सेमामविड्ढि प्रभृतिं सैष दाशर

श्रीरामः इति विसर्गसंधिः अर्थवदधातुरप्रत्ययः प्रातिपदिकं धातुं प्रत्ययं प्रत्ययांतं च वर्जयित्वार्थवच्छब्द
रूपं प्रातिपदिक संज्ञं स्यात् कृत्तद्धितसमासाश्च तद्धितांतौ समासाश्च तथा स्युः स्वौजसमौट्छष्टाभ्यां
भिस् ङेभ्यांभ्यस् ङसिभ्यांभ्यस् ङसोसाम् ङ्योस्सुप सु औ जस् प्रथमा अम् औट् शस् द्वितीया।
टा भ्याम् भिस् तृतीया ङे भ्याम् भ्यस् चतुर्थी ङसि भ्याम् भ्यस् पंचमी ङस् ओस् आम् षष्ठी ङि।
ओस् सुप् सप्तमी ङ्याप्प्रातिपदिकात् ङ्यंतादाबंतात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः सुपः सुप
स्त्रीणि त्रीणि वचनान्येकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः द्व्येकयोर्द्विवचनैकवचने द्वि
त्वैकत्वयोरेतौ स्तः विरामोऽवसानम् वर्णानामभावोऽवसानसंज्ञः स्यात् रुत्वविसर्गौ रामः सरूपाणा।
मेकशेष एकविभक्तौ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते प्रथमयोः पूर्वस।
वर्णः अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः इति प्राप्ते नादिचि आवर्णादिचि परे न पू
र्वसवर्णदीर्घः वृद्धिरेचि रामौ बहुषु बहुवचनम् बहुत्वे एतत्स्यात् चुटू प्रत्ययाद्यौ चुटू इतौ स्तः वि
भक्तिश्च सुप्तिङौ विभक्तिसंज्ञौ स्तः न विभक्तौ तुस्माः विभक्तिस्थास्तवर्गसमा इतो न इति सस्य नेत्वम्
रामाः एकवचनं संबुद्धिः संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात् यस्मात्प्रत्ययविधिस्तदा।

द्विप्रत्ययेंऽगम् यः प्रत्ययो यस्मात्क्रियते तदादिशब्दरूपं तस्मिन्प्रत्यये ऽङ्गसंज्ञं स्यात् एङ्ह्रस्वा
ल.कौ ८ त्संबुद्धेः एङन्ताद्ध्रस्वान्ताच्चांगाद्धल्लुप्यते संबुद्धेश्चेत् संबोधने प्रथमा द्विशब्दः प्राक्प्रयुज्यते हे
राम हे रामौ हे रामाः अमि पूर्वः अकोम्यचि पूर्वरूपमेकादेशः स्यात् रामम् रामौ लशक्वतद्धिते त।
द्धितवर्जप्रत्ययाद्या लशाः कवर्गाश्चेतः स्युः तस्माच्छसो नः पुंसि पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य।
नः स्यात्पुंसि अट्कुप्वाङ्नुम्व्यवायेपि अट्कवर्ग पवर्गश्चाङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितै
श्च व्यवधानेपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे इति शेषः पदान्तस्य पदान्तस्य नस्य णो न स्या
त् रामान् टाङसिङसामिनात्स्याः अदन्ताट्टादीनामिनादयः स्युः णत्वम् रामेण सुपि च यञादौ।
सुप्यतोंगस्य दीर्घः स्यात् रामाभ्याम् अतो भिस ऐस् अतोंगात् भिस ऐस् स्यात् अनेकाल्शित्सर्व।
स्य रामैः ङेर्यः अतोंगात्परस्य ङेर्यादेशः स्थानिवदादेशोनल्विधौ आदेशः स्थानिवत् स्यात् न त्व।
स्थानेलाश्रयविधौ इति स्थानिवत्त्वात्सुपि चेति दीर्घः रामाय रामाभ्याम् बहुवचने झल्येत् झला।
दौ बहुवचने सुप्यतोंगस्यैकारः रामेभ्यः सुपि किम् पचध्वम् वावसाने अवसाने झलां चरो वा
स्यात् रामात् रामाद् रामाभ्याम् रामेभ्यः रामस्य ओसि च अतोंगस्यैकारः स्यात् रामयोः ह्रस्व।

नयापोनुट् ह्रस्वान्तान्नद्यन्तादावन्तात्त्रिगणात्परस्यामोनुडागमः स्यात् नामिश्रुजेन्तांगस्य दीर्घो नामि रा
माणां रामेरामयोः एत्वे कृते आदेशप्रत्यययोः इणकुभ्यां परस्य पदान्तस्यादेशस्य प्रत्ययावय
वस्य च सकारस्य मूर्द्धन्यादेशः स्यात् ईषद्विवृतस्य सस्य तादृश एव षः रामेषु एवं कृष्णादयोदन्ताः
सर्वादीनि सर्वनामानि सर्वविश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम पू
र्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां स्वमज्ञातिधनाख्यायां अन्तरं बहिर्योगो
पसंव्यानयोः त्यद् तद् यद् एतत् इदम् अदस् एक द्वि युष्मद् अस्मद् भवत् किं सर्वः सर्वौ
जसः शी अदन्तात्सर्वनाम्नो जसः शी स्यात् अनेकाल्त्वात्सर्वादेशः सर्वे सर्वनाम्नः स्मै अत।
सर्वनाम्नो ङेः स्मै स्यात् सर्वस्मै ङसिङ्योः स्मात्स्मिनौ अतः सर्वनाम्नः परयोरेतयोः स्तः सर्वस्मात् स
र्वाभ्यां सर्वेभ्यः सर्वस्य सर्वयोः आमि सर्वनाम्नः सुट् अवर्णान्तात्सर्वनाम्नो विहितस्यामः सुडागमा
एत्वषत्वे सर्वेषाम् सर्वस्मिन् शेषं रामवत् एवं विश्वादयोऽप्यदन्ताः संज्ञोपसर्जनीभूतास्तु न सर्वादयः स
र्वो नाम कश्चित्तस्मै सर्वाय देहि अतिक्रान्तः सर्वमतिसर्वः तस्मै अतिसर्वाय उभशब्दो नित्यं द्विवच
नान्तः उभौ २ उभाभ्यां ३ उभयोः २ तस्येह पाठोऽकजर्थः उतरडतमौ प्रत्ययौ प्रत्ययग्रहणे तदन्तग्रहणम्।

स्थितिर्दन्ताः प्राणाः नम इत्यर्थे समः सर्वपर्यायः तुल्यपर्यायस्तु नेह गृह्यते समानामिति ज्ञापका।
ल कौ त् पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां एतानि व्यवस्थायामसंज्ञायां सर्वना।
५ मसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा पूर्वे पूर्वाः पूर्वे पूर्वाः स्वाभिधेयापेक्षावधिनियमो
व्यवस्था व्यवस्थायां किम् दक्षिणा गाथकाः कुशला इत्यर्थः असंज्ञायां किम् उत्तराः कुरवः स्व
मज्ञातिधनाख्यायां ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा स्वे स्वाः आत्मीया आ।
त्मान इति वा ज्ञातिधनवाचिनस्तु स्वाः ज्ञातयोऽर्था वा अन्तरं बहिर्योगोपसंव्यानयोः बाह्ये परि।
धानीये चार्थे अन्तरशब्दस्य प्राप्ता संज्ञा जसि वा अन्तरे अन्तरा वा गृहाः बाह्या इत्यर्थः अन्तरे अन्तरा वा
शाटकाः परिधानीया इत्यर्थः पूर्वादिभ्यो नवभ्यो वा एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः पूर्वस्मात्।।
पूर्वात् पूर्वस्मिन् पूर्वे एवं परादीनामपि शेषं सर्ववत् तृतीयासमासे सर्वनामता न स्यात् मासपू
र्वाय तृतीयासमासार्थवाक्येऽपि न मासेन पूर्वाय द्वन्द्वे च उक्तसंज्ञा न वर्णाश्रमेतराणां विभा
षा जसि वर्णाश्रमेतरे वर्णाश्रमेतराः प्रथमचरमतयाल्पार्धकतिपयनेमाश्च एते जस्युक्त।
संज्ञा वा स्युः प्रथमे प्रथमाः तयः प्रत्ययः द्वितये द्वितयाः शेषं रामवत् नेमे नेमाः शेषं सर्ववत् ॥

तीयस्यङित्स्वा: द्वितीयस्मै द्वितीयायेत्यादि एवं तृतीयः निर्जरः जराया जरसन्यतरस्यां जरायाज
रस्त्वा: जादौ विभक्तौ पदांगाधिकारे तस्य तदंतस्य च ग्रहणं अनेकाल्शित्सर्वस्य आदेशः इति प्राप्ते।
निर्दिश्यमानस्यादेशा भवंति एकदेशविकृतमनन्यवत् जरशब्दस्य जरस् निर्जरसौ निर्जरा
सः उपजीव्यविरोधान्न जरस् निर्जरैः इत्यादि पक्षे हलादौ च रामवत् विश्वपाः दीर्घाज्जसि च दीर्घा
त्तसि इचि च परे शब्दे सवर्णदीर्घो न विश्वपौ विश्वपाः विश्वपौ विश्वपौ सुडनपुंसकस्य स्वादि पंच।
वचनानि सर्वनामस्थान संज्ञानि स्युरक्लीबस्य स्वादिष्वसर्वनामस्थाने कप्रत्ययावधिषु स्वा
दिष्वसर्वनामस्थानेषु परेषु पूर्वं पदसंज्ञं स्यात् यचि भम् यकारादि · जादिषु च स्वादिष्वसर्वना
मस्थानेषु परेषु पूर्वं पदसंज्ञं स्यात् (यचि भम् यकारादि · जौ आकडारादेका संज्ञा।। इत ऊर्ध्वं क
डारिराकर्मधारयपर्यन्तः एकस्यैकैव संज्ञा ज्ञेया या परानवकाशा च आतो धातोः आकारान्तो
यो धातुस्तदंतस्य भस्यांगस्य लोपः अलोऽन्त्यस्य विश्वपः विश्वपा विश्वपाभ्यां विश्वपाभिः इत्यादि।।
एवं शंखध्मादयः धातोः किम् हाहाः हाहौ हाहाः हाहान् अकः सवर्णे दीर्घः हाहा हाहाभ्यां।।
हाहाभिः वृद्धिरेचि हाहै अकः सवर्णे दीर्घः हाहाम् आद्गुणः हाहे हाहौः हाहाः हे हाहाः प्रथम।

योः पूर्वसवर्णः हरी जसि च ह्रस्वान्तस्याङ्गस्य गुणः हरयः ह्रस्वस्य गुणः संबुद्धौ हे हरे हरिं हरी ह-
लु कौ रीन् शेषो घ्यसखि शेष इति स्पष्टार्थं ह्रस्वौ याविदुतौ नदीतं सखिवर्जं घिसंज्ञः स्यात् आङो नास्त्रिया
९ घेः परस्याङो नास्यादस्त्रियाम् आङिति टासंज्ञा हरिणा हरिभ्यां हरिभिः ङिति घि संज्ञकस्य ङिति।
सुपि गुणः हरये हरिभ्यां गुणोकृते ङसिङसोश्च एङो ङसिङसोः सोरति पूर्वरूपमेकादेशः हरेः हरि।
भ्यां हरिभ्यः हरेः हर्योः हरीणां अच्च घेः इदुद्भ्यामुत्तरस्य ङेरौत् घेरत् इद्वियचि हरौ हर्योः हरिषु
एवं कव्यादयः अनङ् सौ सख्युरङ्गस्यानङादेशः असंबुद्धौ सौ। अलोन्त्यात्पूर्व उपधा अन्त्यादलः पू-
र्वो वर्ण उपधासंज्ञः स्यात् सर्वनामस्थाने चासंबुद्धौ नान्तस्योपधाया दीर्घोऽसंबुद्धौ सर्वनामस्था-
ने। अपृक्त एकाल् प्रत्ययः एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् हल्ङ्याब्भ्यो दीर्घात्सुतिस्य-
पृक्तं हल् हलन्तात्परं दीर्घौ यौ ङ्याबौ तदन्ताच्च परं सुतिसि इत्येतदपृक्तं हल्लुप्यते। प्रत्ययलोपे प्रत्य-
यलक्षणम् प्रत्ययेलोपे पि तदाश्रितं अङ्गकार्यं स्यात् नलोपः प्रातिपदिकान्तस्य प्रातिपदिकसं-
ज्ञकं पदं तदन्तं तस्य नस्य लोपः स्यात् सखा सख्युरसंबुद्धौ सख्युरङ्गात्परं संबुद्धिवर्जं सर्वनामस्थानं
णिद्वत्स्यात् अचो ञ्णिति अजन्ताङ्गस्य वृद्धिर्ञ्णिति णिति च सखायौ सखायः हे सखे सखायम्

खायौ सखीन् सख्या सखिभ्यां सखिभिः सख्ये सखिभ्यां सखिभ्यः ख्यत्यात्परस्य खितिशाद्भ्यां
खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरुतः सख्युः सखिभ्यां सखिभ्यः सख्युः सख्योः स
खीनां सख्यौ इन परस्य ङेरौत सख्यौ शेषं हरिवत् पतिः समास एव घिसंज्ञः पत्या पत्ये पत्युः पत्यौ प
त्योः शेषं हरिवत् समासे तु भूपतये कतिवहुवचनान्तः बहुगणवतुडतिसंख्या ष्णो डुतिच ड
त्यन्तासंख्या षट्संज्ञा स्यात् षड्भ्यो लुक् जश्शसोः षड्भ्यः परयोः जश्शसोर्लुक् स्यात् प्रत्ययस्य लुक्।
क्श्लुलुपः लुक् श्लु लुप् शब्दैः कृते प्रत्ययादर्शने क्रमात् तत्संज्ञं स्यात् जसि चेति गुणे प्राप्ते न लुम
ताङ्गस्य लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् कति २ कतिभिः २ कतिभ्यः २ कतीनां कति
षु अष्ट सन्तषट्संज्ञका ˘˘ त्रि स्वरूपाः त्रयः त्रीन् त्रिभिः त्रिभ्यः २ त्रेस्त्रयः आमि कौ रोन्तादेशो त्र। त्रिशब्दस्य त्रयादेशः स्यादामि
याणां त्रिभुगोणांतेपि प्रियत्रयाणां त्यदादेरत्वम्: एषामकारोन्तादेशः स्याद्विभक्तौ द्विपर्यन्तानामेवेष्टः
द्वौ २ द्वाभ्यां ३ द्वयोः २ पातिलोकमिति पपीः सूर्यः पप्यौ पप्यः पपीं पप्यौ पपीन् पप्या पपीभ्यां ३
पपीभिः पप्ये पप्यः पप्योः पप्यां पपीयप्यां: पपीषु एवं वातप्रम्यादयः वह्यः श्रेयस्यो यसस्वहुश्रे
यसीः ह्रस्वात्यो नदी ईदूदन्तौ नित्यस्त्रीलिंगौ नदीसंज्ञौ स्तः प्रथमलिंगग्रहणं च पूर्वस्मात्प्रेयसोपः

ल कौ
११

सर्जिनेनेपिनदीनेवक्रूक्ष्यमित्यर्थः अंबार्थनद्योर्ह्रस्वः अंबार्थानां नद्यंतानां च ह्रस्वः स्यात्संबुद्धौ सोपरे हे व
क्रश्रेयसि आण्नद्याः नद्यंतात्परेषां ङितां आडागमः स्यात् आटश्च आटोचि परे वृद्धिरेकादेशः वक्रश्रेय
स्यै वक्रश्रेयस्याः २ वक्रश्रेयसीनां ङेराम्नद्याम्नीभ्यः नद्यंतादावंतान्नीशब्दाच्च परस्य ङेः आम स्यात् वक्र।
श्रेयस्यां शेषं पपीवत् अस्यन्तत्वात्सुलोपः अतिलक्ष्मीः शेषं वक्रश्रेयसीवत् प्रधीः अचि श्नुधातुभ्रु।
वां य्वोरियङुवङौ श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य भ्रु इत्यस्येयङ् वङौ स्तोऽजादौ प्रत्यये इति प्राप्ते परेन
काचो संयोगपूर्वस्य धात्ववयवसंयोगपूर्वो न भवति यः वर्णस्तदंतो यो धातुस्तदंतस्यानेकाचोंगस्य
यणजादौ प्रत्यये स्यात् सुश्रियौ यवक्रियौ प्रध्यौ प्रध्यः अमि शसि च प्रध्यं प्रध्यौ प्रध्यः प्रध्या प्रधीभ्यां
प्रधीभिः प्रध्ये प्रध्यः २ प्रध्योः प्रध्यां प्रध्यि शेषं पपीवत् एवं ग्रामणीः ङौतु ग्रामण्यां नीतिश्च प्रादयः
क्रियायोगे गतिसंज्ञाः स्यात् गतिकारकेतरपूर्वपदस्य यणनेष्यते शुद्धधियौ न भूः सुधियोः एतयोरवि।
सुधियादिन सुधियौ सुधियः अमि शसि च परत्वादियङ् सुधियं सुधियः सुधिया इत्यादि सुखमिच्छतीति
सुखीः सुख्यौ सुख्यः सुतीः सुत्यौ सुत्यः शेषं प्रध्यीवत् शंभुर्हरिवत् एवं भान्वादयः तृज्वत्क्रोष्टुः क्रोष्टुः।
तृज्जन्नन्नतस्संवर्तते असंबुद्धौ सर्वनामस्थाने क्रोष्टुरित्यस्य क्रोष्टृ प्रयोक्तव्यमित्यर्थः ऋतोङि सर्वनाम ॥

स्थानयोः ऋदंताङ्गस्य गुणः ङौ सर्वनामस्थाने च इति प्राप्ते ऋदुशनस्पुरुदंशोनेहसां च ऋदंतानामुश
नसादीनां चानङ् स्यादसंबुद्धौ सौ परे अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां एषामु
पधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने क्रोष्टा क्रोष्टारौ क्रोष्टारः ऋस्वस्य गुणः हे क्रोष्टः हे क्रोष्टारौ हे क्रोष्टारः क्रोष्ट
ारं क्रोष्टारौ प्रथमयोः पूर्वसवर्णः तस्माच्छसो नः पुंसि क्रोष्टून् विभाषा तृतीयादिष्वचि ।। अजादिषु तृ
तीयादिषु क्रोष्टुर्वा तृज्वत् शेषाप्सम्भवे आङो नाऽस्त्रियां क्रोष्टुना क्रोष्ट्रा क्रोष्टुभ्यां क्रोष्टुभिः क्रोष्ट्रे।
घेर्ङिति एचोऽयवायावा क्रोष्टवे क्रोष्टुभ्यां क्रोष्टुभ्यः ऋत उत् ऋतः ङसिङसोरति उकार एकादेशः
रपरः रात्सस्य रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य क्रोष्टुः क्रोष्टोः क्रोष्टुभ्यां क्रोष्टुभ्यः क्रोष्टुः क्रोष्टोः
इको यणचि क्रोष्ट्रोः नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन ह्रस्वनद्यापो नुट् नामि क्रो।
ष्टूनां क्रोष्टरि क्रोष्टुषु। ऊङोरनयोरत् क्रोष्टोपदेशो हलादौ च शंभुवत् हूहूः हूह्वौ हूहूः इत्यादि अतिचमू
शब्दे तु नदीकार्यविशेषः हे अतिचमु अतिचमूः प्रथमयोरिति प्राप्ते दीर्घाज्जसि चेति निषेधः इको य
णचि इति अतिचम्वौ अतिचम्वः अतिचमूं अतिचम्वौ इको यणचि इति प्राप्ते प्रथमयोः पूर्वसवर्णः इ
यमपवादः अतिचमून् अतिचम्वा अतिचमूभिः इको यणचि आण्नद्या आट् अतिचम्वै अतिच

ल कौ
१२

ष्टाः २ अतिचमूनां अतिचमोः खलपूः ओःसुपि धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदंतो यो धातुस्तदं।
तस्यानेकाचोंगस्य यण् स्यादचि सुपि खलप्वौ खलप्वः एवंसुल्वादयः सुष्टुलुनातीति सुलूः स्वभवती।
तिस्वभूः अचिश्नुधातुभ्रुवांय्वोरियङुवङौ नभूसुधियोः एतयोरपि स्वभुवः वर्षाभ्वश्च अस्य यण् स्या
दचि सुपि वर्षाभ्वौ इत्यादि दृन्भूः दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः दृन्भ्वौ एवं करभूः पुनर्भूः
धाता ऋदुशनस्पुरुदंशोनेहसांच ॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणामुपधाया।
दीर्घो नलोपः प्रातिपदिकांतस्येति नकारस्य लोपः स्यात् धातारं धातारौ धातारः ऋवर्णान्नस्यण
त्वंवाच्यं धातृणां एवंनप्त्रादयः नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं उगादीनां तृन्नन्तानां चेत्तर्हि नप्त्रा
दीनामेव तेनेह न पिता पितरौ पितरः पितरं शेषं धातृवत् एवंजामात्रादयः ना नरौ नरः नृच अस्य ना
मि वा दीर्घः नृणां नृणां गोतो णित् गोकारादिहितं सर्वनामस्थानं णिद्वत् गौः गावौ गावः औतोम्
शसोः आ ओतः इति छेदः ओदंतादमशसोरचि आकार एकादेशः स्यात् गाम् गावौ गाः गवा गोभ्यां गो।
भिः गवे गोः इत्यादि रायो हलि अस्याकारादेशो हलि विभक्तौ राः रायौ रायः राभ्यामित्यादि ग्लौः
ग्लावौ ग्लावः ग्लौभ्यामित्यादि इत्यजंताः पुंलिंगाः रमा अजाद्यतष्टाप् अजादीनामकारांतस्य च वाच्यस्य

स्त्रीत्वे नेत्रयोत्से टाभ्यात् रामा औङ् आपः आबन्तादौङः शीः स्यात् ङोङितौ कारविभक्तेः संज्ञा रमे रमाः संबु
द्धौ च आप एकारः हे रमे हे रमे हे रमाः रमाम् रमे रमाः आङि चापः आङि ओसि च आप एकारः रमया रमा
भ्यां रमाभिः याडापः आयोङितो याट् वृद्धिः रमायै रमाभ्यां रमाभ्यः रमायाः २ रमयोः रमाणां रमायाम् रमा
योः रमासु ० एवं दुर्गा गिरिकादयः सर्वा सर्वे सर्वाः सर्वनाम्नः स्याट् ह्रस्वश्च आबन्तात्सर्वनाम्नो ङितां स्या
डापश्च ह्रस्वः। सर्वस्यै सर्वाभ्यां सर्वाभ्यः सर्वस्याः २ सर्वासाम् शेषं रमावत् एवं विश्वादय आबन्ताः वि
भाषादिकसमासे बहुव्रीहौ सर्वनामता वा हल् आबयोर्दीर्घात्सतिस्यपृक्तं हल् उत्तरपूर्वा औङ् आपः उ
त्तरपूर्वे प्रथमयोः पूर्वसवर्णः उत्तरपूर्वाः अमि पूर्वः उत्तरपूर्वाम् उत्तरपूर्वे उत्तरपूर्वाः आङि चापः उत्तर।
पूर्वया सर्वनाम्नां स्याट् ह्रस्वश्च वृद्धिः उत्तरपूर्वस्यै याडापः आट् च उत्तरपूर्वायै उत्तरपूर्वाभ्याम् उत्तर।
पूर्वाभ्यः उत्तरपूर्वस्याः उत्तरपूर्वायाः २ उत्तरपूर्वयोः उत्तरपूर्वासाम् उत्तरपूर्वाणाम् उत्तरपूर्वस्याम् उत्त
रपूर्वायाम् उत्तरपूर्वासु तृतीयस्य ङित वा संज्ञा द्वितीयस्यै द्वितीयायै एवं तृतीया अम्बार्थेति ह्रस्वः हे
अम्ब हे अक्क हे अल्ल असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न हे अम्बाडे हे अम्बाले हे अम्बिके जरा जरसौ।
जेरस्यादिपक्षे रमावत् गोपा विश्वपावत् मतिः ङिति ह्रस्वश्च इयङ्वङ्स्थानौ स्त्रीशब्दं भित्वा नित्यं स्त्रीलिङ्गौ

वीदूतौ ह्रस्वौ च य्वर्णौ वर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति मत्यै मतये मत्याः मतेः वदीर्न पदेश्चाेदितिङेरात्नद्या।
ल कौ मे २ इदुद्भ्यां नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् मत्याम् मतौ शेषं हरिवत् एवं बुद्ध्यादयः त्रिचतुरोः स्त्रि
१९ यां तिसृचतसृ स्त्रीलिङ्गयोरेतयोरेतौ स्तो विभक्तौ अचि र ऋतः तिसृचतसोरृकारस्य रादेशोऽचि गुणदीर्घोत्वाना
मपवादः तिस्रः २ तिसृभिः ॥ आमि नुट् न तिसृचतसृ एतयोर्नामि न दीर्घः तिसृणाम् तिसृषु द्वे द्वाभ्यां २
द्वयोः २ गौरी गौर्यौ गौर्यः हे गौरि गौर्यै इत्यादि एवं नद्यादयः लक्ष्मीः शेषं नदीवत् एवं तरीतन्त्र्यादयः स्त्री
हे स्त्रि स्त्रियाः अस्य इयङ् जादेशः स्यादचि परे स्त्रियौ स्त्रियः वाम्शसोः स्त्रिया इयङ् वाऽमि शसि च परे स्त्रियं ॥
स्त्रीम् स्त्रियौ स्त्रियः स्त्रीः स्त्रिया स्त्रियै स्त्रियाः २ परत्वान्नुट् स्त्रीणां स्त्रीषु श्रीः श्रियौ श्रियः श्रियं।
श्रियौ श्रियः श्रिया नेयङ् ॥ वङ्स्थानावस्त्री इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री।
स्त्री हे श्रीः ङिति ह्रस्वश्च श्रियै श्रिये श्रियाः श्रियः वामि इयङ् वङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसं ॥
ज्ञौ स्तो न तु स्त्री श्रीणाम् श्रियाम् श्रियि श्रियाम् धेनुर्मतिवत् धेनुः धेनू धेनवः धेनुम् धेनू धेनूः
धेन्वा धेनुभ्याम् धेनुभिः धेन्वै धेनवे धेनुभ्याम् धेनुभ्यः धेन्वाः धेनोः धेन्वा धेनौ स्त्रियां च स्त्रीवा।
वी क्रोष्टुः स्त्रीवदूपं लभते ऋन्नेभ्यो ङीप् ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् क्रोष्ट्री गौरीवत् वधू

गौरीवत् पृथ्वीवत् स्वयंभूः पुंवत् न षट्स्वस्रादिभ्यः पंभ्यो ङीप्टापौ न स्तः स्वसा तिस्रश्चतस्रश्च ननां
दा दुहिता तथा याता मातेति सप्तैते स्वस्रादय उदाहृताः स्वसा स्वसारौ शेषं पितृवत् मातापितृ।
वत् शसि मातॄः गौरीवत् राङ्वत् नौः ग्लौवत् इत्यजंताः स्त्रीलिंगाः अतोम् अतोंगात् क्लीबात्स्व।
मोरम् ज्ञानं पङ् ह्रस्वादीति हल्लोपः हे ज्ञान नपुंसकाच्च क्लीबादौङः शी भसंज्ञायां यस्येति च।
ईकारे तद्धिते च परे भस्य वर्णावर्णयोर्लोपः इति लोपे प्राप्ते औङः श्यां प्रतिषेधो वाच्यः ज्ञाने जश्शसोः
शिः क्लीबात् शि सर्वनामस्थाने नपुंसकस्य शिरित्येतत्सर्वनामस्थानसंज्ञं स्यात् नपुंसकस्य झलचः
झलंतस्याजंतस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने मिदचोन्त्यात्परः अचां मध्ये योन्त्यस्तस्मात्पर।
स्तस्यैवांत्यावयवो मित्स्यात् उपधाया दीर्घः ज्ञानानि पुनस्तद्वत् शेषं रामवत् पर्वदन्नादयः अद्ड्डत
रादिभ्यः पंचभ्यः पंभ्यः क्लीबेभ्यः स्वमोरद्डादेशः टेः डिति भस्य टेर्लोपः कतरत् कतरद् कतरे कतरा।
णि हे कतरत् शेषं पुंवत् कतमत् इतरत् अन्यत् अन्यतरत् अन्यतमस्य तु अन्यतममित्येव एक
तरान्नित्यं निषेधो वक्तव्यः एकतरं ह्रस्वो नपुंसके प्रातिपदिकस्य अजंतस्य प्रातिपदिकस्य ह्रस्वः स्यात्।।
श्रीपं ज्ञानवत् स्वमोर्नपुंसकात् लुक् वारि इकोचि विभक्तौ इगंतस्य क्लीबस्य नुमचि विभक्तौ वारिणी।

वारिणि तेन तुमते तस्यानित्यत्वात्तदेतद्बुद्धिनिमित्तोगुणः देवारि हे वारे च हि तिगुणो भागे वृद्धौ नतत्व।
ल.कौ. द्वावगुणोभ्योऽगम् पूर्वविप्रतिषेधेन वारिणोवारिणः वारिणोः नुमचिरेतिनुट् वारीणांवारिणि हलादौह
१४ रिवत् अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः दाधावपि अस्थ्योपेनः ऋङ्गावयवोः सर्वनामस्थानान्नादिस्वादिपि
यायोत् तस्याकारस्यलोपःदध्ना दध्नेदध्नः दध्नोः २ विभाषाङिश्योः अङ्गावयवोऽन्नादिस्वादिमत्ययपरे।
योत् तस्याकारस्यलोपोवाङिश्योः दीध्नदधनि शेषंवारिवत् एवमस्थिसक्थ्यक्षि सुधिसुधिनी सुधीति
हेसुधि हे सुधे नतीयादिषु भाषितपुंस्कंपुंवद्गालवस्य प्रवृत्तिनिमित्तेकोभाषितपुंस्कंमिर्गतंक्लीवंपुंवत्।
अनदयेस्वनादिनेरत्यादिशेषंहरिवत् दाधावपि सधियासधिनेत्यादि मधुमधुनी मधूनि हेमधो
हेमधु एवमंबादयः सुलसुलुनी सुलूनि सुलासुलुनेत्यादि धातृधातृणीधातॄणि हेधातः हे
धातृधात्रा धातृणा एतेनात्कर्त्रादयापवरङ्ग्रसादेशे प्रभुप्रभुनि प्रभूनि प्रभुनेत्यादि प्ररि प्ररि
णी प्ररीणि प्ररिणा एकदेशविकृतमनन्यवत् प्रराभ्यां प्ररीणाम् सनुसनुनीसनूनि सननेत्या।
दि इत्यजंताः नपुंसकलिंगाः होढः कलिपदांतेचलिट्लिड्लिहौलि लिहालिड्भ्यांलिट्सुलिट्सु दा
देर्धातोर्घः कलिपदांतेचोपदेशेदादेर्धातोर्घः एकाचोवशोभष्झषंतस्यसध्वोः धातवयवसेकाचो झषंत

स्वघोभरसेषपदांतेच मधुक्मधुग् उड्डौउड्डः उग्भ्यांउड्डः वाउड्डम्उड्डसु स्त्रिहां पथोरस्य वा चः फलिपा।
दांतेच सुकसुगसुट् सुडसुहौ सुग्भ्यो सुत्सु सुट्म एवंमकृधातोरेः धमः स्तुकस्नगस्वट्स्वट् एवंस्विहृइमा
णः संप्रसारणंयणः स्थानेक्रियमाणं इकसंप्रसारणसंज्ञः स्यात् वाहऊठभस्यवाहः संप्रसारणमूठ्सम।
सारणाच्च संप्रसारणाद्वि इः वृद्धिः विश्वौहः विश्वौहे इत्यादि चतुरनडुहोरामुदात्तः सर्वेना।
मस्थानेसावनडुहः नुमस्यात् अनड्वान् अम् संबुद्धौ चतुरनडुहोः हेअनडुत् अनड्वाहौ अनड्वहः
वस्रंस्रध्वंसनडुहांदः सांतवसंतस्रसंसादेश्वदः पदांते अनडुद्भ्याम् पदांतेकिम् स्रस्तम् महः सा
तुः मः सांतरूपस्यमहः तस्यमुह्ह्मादेशः त्रेरायाद्त्रयसाहे त्रिरायाक्षांइत्यादिवडोतदिविति प्रातिपदि।
कस्योऽस्ये स्यौः सहिनौ दिवउत् पदांते सुद्युभ्यां इत्यादि चत्वारः चतुरः चतुर्भिः चतुर्भ्यः २ षट्च।
तुर्भ्यश्च षभ्यः श्रामोनुडागमः षाभ्यांतोणः समानपदे चतुर्णां रोःसुपि रोरेवविसर्गः सुपि चतु।
र्षु मोनोधातोः पदांतेमश्चात् प्रशान्मौ प्रशान्भ्यां किमः कः विभक्तौ कः कौ के इत्यादिसर्ववत् इदमो
मः सौमसरायन्तापवादः इद्दोः द्वेषि इदमइदोयसोऽपुंसि अयंसरा त्रे अनोऽगणे अपदांताद
तो गुणोपरस्यमेकादेशः दश्च इदमोदस्यमः स्याद्विभक्तौ इमौ इमेत्यदादेः संबोधनेनास्तीत्युत्सर्गः ॥

अनाप्यकः । अककारस्य इदम इदोऽनापि विभक्तौ याविति समाहारः । अनेन हलि लोपः । अककारस्येद
ल कौ मः इदो लोपः स्यादापि हलादौ । नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे । आद्यन्तवदेकस्मिन् एकस्मिन् क्रियमाणं का
५५ र्यमाद्यन्तवत्स्यात् । सुपि चेति दीर्घः । आभ्याम् । नेदमदसोरकोः । अककारयोरिदमदसोर्भिस ऐस न । एभिः । अ
स्मै । एभ्यः । अस्मात् । अस्य । अनयोः २ । एषाम् । अस्मिन् । एषु । द्वितीयाटौस्स्वेनः । इदमेतदोरन्वादेशे । किंचित् कार्यं वि
धातुं उपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । यथानेन व्याकरणमधीतमेनं छन्दोऽध्यापय । अ
नयोः पवित्रं कुलमेनमेनयोः प्रभूतं स्वमिति । एनं एनौ एनान् एनेन एनयोः । राजा । नङिसंबुद्ध्योः । नस्य लो
पो न ङौ संबुद्धौ च । हे राजन् । परमे व्योमन् । ङावुत्तरपदे प्रतिषेधः । ब्रह्मनिष्ठः । राजानौ । राजानः । राजानं राज्ञः ।
नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति । सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो ना
न्यत्र राजाश्व इत्यादौ इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न । राजभ्याम् । राज्ञि राजनि । यज्वा यज्वानौ यज्वानः ।
न संयोगाद्वमन्तात् । वमन्तात्संयोगादणोऽकारस्य लोपो न । यज्वनः । यज्वभ्याम् । ब्रह्मा ब्रह्माणौ ब्रह्माणं ब्र
ह्माणौ ब्रह्मणः ब्रह्मणा । इन्हन्पूषार्यम्णां शौ । एषां शावेवोपधाया दीर्घः । सौ च । इन्नादीनामुपधाया
दीर्घोऽसंबुद्धौ सौ । वृत्रहा । हे वृत्रहन् । एकाजुत्तरपदे णः । एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्नि

भिन्ना तस्य रस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णः वृत्रहणौ हो हन्तेर्ञ्णिन्नेषु ञिति णिति प्रत्यये ने।
च परे हन्तेर्हस्य कुत्वं हन्तेरत्र विस्य हन्तेरकारश्च विस्यैव नस्य णो नामस्य वृत्रघ्नः वृत्रघ्ना वृत्रह। भ्यां वृत्रघ्निवृ
त्रहणि इत्यादि एवं शार्ङ्गिन् यशस्विन् अर्यमन् पूषन् पूषा पूषणौ ष्णोर्योगेऽस्मः पूष्णः पूषभ्यां पू।
ष्णि पूषणि मघवा बहुलं मघवन्शब्दस्य वा तृ इत्यन्तादेशः स्यात् ऋ इत् नाद्यंतं यथा कृतमनेकाल्त्वं उगिद।
चां सर्वनामस्थाने चाधातोः अधातोरुगितो नलोपिनोञ्चतेश्च नुम् स्यात् सर्वनामस्थाने मघवान् म।
घवंतौ मघवंतः हे मघवन् मघवंतं मघवतः मघवद्भ्यां तदभावे मघवा राजवत् श्वयुवम
घोनामतद्धिते अन्नन्तानामेषामतद्धिते परे संप्रसारणं स्यात् मघोनः श्व युवन्भ्यां श्वा श्वानौ
शुनः २ शुना श्वभ्यां अर्वा हे अर्वन् अर्वणस्त्रसावनञः नञा रहितस्यार्वन्नित्यस्य तृ इत्यन्तादेशो
न तु सौ उगित्वान्नुम् अर्वंतौ अर्वद्भ्यां पथि प॰ भुक्षायामात्मौ एषामाकारोऽन्तादेशः स्यात् इतो
त्सर्वनामस्थाने पथ्यादेरिकारस्याकारः स्यात् सर्वनामस्थाने थो न्थः पथिमथोस्थस्य न्थादेशः सर्व।
नामस्थाने पंथाः पंथानौ पंथानः भस्य टेर्लोपः भस्य पथ्यादेष्टेर्लोपः पथः पथिभ्यां एवं मथ्याः ऋ
भुक्षाः ष्णान्ता षट् षान्ता नान्ताश्च संख्या षट्संज्ञाः स्यात् पंच पंचभ्यः तट्नो यथायाः नान्तस्योपधा।

ल.कौ.
१८

यादीर्घोनामिपंचानां पंचसप्तअष्टन् आविभक्तौ हलादौ वास्यात् अष्टाभ्यः औश् कृताकारादष्टनो जश्शसोरौ
श् अष्टभ्यः इति वक्तव्ये कृताकारनिर्देशो जश्शसोर्विषये यस्मात्तज्ज्ञापयति अष्टौ अष्टाभिः अष्टाभ्यः २ अष्टानां अ
ष्टासु आत्वाभावे अष्ट पंचवत् ऋत्विक्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचां च एभ्यः क्विन् स्यात् अंचेः सुप्युपपदे युजि
क्रुंचोः केवलयोः कृतानि ते कृदतिङ् अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः वेरपृक्तस्य लोपः अ
पृक्तस्य वस्य लोपः क्विन्प्रत्ययस्य कुः क्विन्प्रत्ययो यस्माद्विहितस्तस्य कुः पदान्ते ऋत्विक् ऋत्विजौ ऋत्विग्भ्यां युजेरसमा
से युजेः सर्वनामस्थाने नुम् स्यादसमासे संलोपः संयोगान्तस्य लोपः कुत्वेन नस्य ङः युङ् युंजौ युंजः युग्भ्यां
अन्ते समासे क्विचोः कुः चवर्गस्य कवर्गः स्यात् झलि पदान्ते च सुयुक् सुयुजौ सुयुग्भ्यां निमित्ताभावे नैमि।
त्तिकस्याप्यभावः खन् खंजौ खंजभ्यां व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः झलि पदान्ते च जश्त्वे।
राड् राट् राजौ राजः एवं विभ्राड् देवेट् देवेजौ विश्वसृट् परिमृट् परौ व्रजेः षः पदान्ते परावुपपदे व्रजेः क्विप्स्या
द्दीर्घश्च पदान्ते षत्वमपि परिव्राट् परिव्राजौ विश्वस्य वसुराटोः विश्वस्य दीर्घो वसौ राटि च परे विश्वाराट्
इति पदान्तोपलक्षणार्थं चेतनममविवक्षितं विश्वराजौ विश्वाराजः स्कोः संयोगाद्योरन्ते च पदान्ते झलि च परे
यः संयोगस्तदाद्योः सकारककारयोर्लोपः भ्रस्ज् भृट् भृड् सस्य श्चुत्वेन शः जश्त्वेन जः झलां जश् झशि इति शस्य जः भृज्जौ भृज्जः त्यदा।
द्यत्वे पररूपत्वे त्यदः सः स्यात् अनन्त्ययोः त्यदादीनां तदोः सः स्यादसौ अनन्त्ययोः स्यः त्यौ त्ये सः तौ ते यः यौ ये एषः ए
तौ एते इत्यादि ङेः प्रथमयोरम् युष्मदस्मद्भ्यां परस्य ङेः प्रतिमान्द्वितीययोश्च अमादेशः त्वाहौ सौ अनयोर्मपर्यं

तस्य त्वाहावादेशौ स्तः सौ शेषे लोपः आन्ययत निमित्ते विभक्तौ परतः एतयोः शेषे लोपः त्वं अहं युवावौ द्विवचने इयो रुक्तावनयोर्मि
मपर्यन्तयोर्युवावौ स्तो विभक्तौ प्रथमाया च द्विवचने भाषायां औङ् एतयोरात्वं लोके युवां आवां यूयवयौ जसि अनयोर्मपर्य
न्तस्य यूयवयौ स्तः यूयं वयं त्वमावेकवचने एकस्योक्तावनयोर्मपर्यन्तयोस्त्वमौ स्तः द्वितीयायांच अनयोरात्स्यात् त्वां मां यु
वां आवां शसो नः आभ्यां शसो नः स्यादमोपवादः आदेः परस्य संयोगान्तस्य लोपः युष्मान् अस्मान् योचि अनयोर्यादेशोऽनादे।
शोन्नादौ विभक्तौ त्वया मया युष्मदस्मदोरनादेशे अनयोरात्स्यात् अनादेशे हलादौ विभक्तौ युवाभ्यां आवाभ्यां युष्माभिः।
अस्माभिः तुभ्यमह्यौ ङयि अनयोर्मपर्यन्तयोरेतौ स्तः तुभ्यं मह्यं · भ्यम आभ्यां परस्य युष्मभ्यं अस्मभ्यं एकवचनस्य च
आभ्यां ङसेरत् त्वत् मत् पंचम्या अत् आभ्यां पंचम्या भ्यसोत् स्यात् युष्मत् अस्मत् तवममौ ङसि अनयोर्मपर्यन्तस्य तव।
मम आदेशा स्यात् अनयोर्मपर्यन्तस्य युष्मदस्मद्भ्यां ङसोश् तवमम युवयोः आवयोः साम आकं आभ्यां साम आकं स्यात्।
न युष्माकं अस्माकं त्वयि मयि युष्मासु अस्मासु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ पदात्परयोरपादादौ।
स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वान्नावेतावादेशौ स्तः बहुवचनस्य वस्नसौ उक्तविधयोः अनयोः षष्ठ्यादिबहुवचनान्तयोर्वस
नौ स्तः तेमयावेकवचनस्य उक्तविधयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः त्वामौ द्वितीयायाः द्वितीयैकवचनान्त।
योः त्वा मा एतौ स्तः श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः (सुखं वां नौ ददा
त्वीशः पतिर्वामपि नौ हरिः सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र वः स नः २ एकवाक्ये युष्मदस्मदादेशा वक्तव्याः एकति।
ङ्वाक्ये तेनेह न ओदनं पच तव भविष्यति एते वान्नावादयः आदेशा अनन्वादेशे वा वक्तव्याः अन्वादेशे तु नित्यं स्युः धा
ता ते भक्तोस्ति धाता ते भक्तोस्तीति वा तस्मै ते नमइत्येव सूयात् सपादौ पादः एतत्पादशब्दो नेयपदं गंभतदव एवस्य याछवस्य।

दादेशः सुपदः सुपाद्भ्यां अग्निमत् अनिदितां हल उपधायाः क्ङिति हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः किति
ङिति नुम् संयोगान्तस्य लोपः नस्य कुः कुत्वेन ङः प्राङ् प्राञ्चौ प्राञ्चः अचः लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः चौ लुप्ता
कारतकारे च तौ परे पूर्वस्याणो दीर्घः प्राचः प्राग्भ्यां प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रतीचः प्रत्यग्भ्यां उदङ् उदञ्चौ उद ईत् उच्छ
ब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत् उदीचः उदग्भ्यां समः समिः वप्रत्यये अञ्चतौ सम्यङ् सम्यञ्चौ समीचः
सम्यग्भ्यां सहस्य सध्रिस्तथा सध्र्यङ् तिरसस्तिर्यलोपे अलुप्ताकारे चतौ वप्रत्यये परे तिरसस्तिर्यादेशः तिर्यङ् तिर्यञ्चौ ति
र्यञ्चः तिरश्चः तिर्यग्भ्यां नाञ्चेः पूजायां पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न प्राङ् ।: प्राञ्चौ नलोपाभावादलोपो
न प्राञ्चः प्राङ्भ्यां प्राङ्क्षु एवं पूजार्थे प्रत्यङ्ङादयः क्रुङ् क्रुङ्भ्यां पयोमुक् पयोमुचौ पयोमुग्भ्यां महत् पूजायां वर्तमाने शत्र।
महद्बृहज्जगच्छतृवच्च एते निपात्यन्ते शतृवच्चैषां कार्यं स्यात् उगिदचाम् सान्तमहतः संयोगस्य सान्तसंयोगस्य महतश्च
यो नकारस्तस्योपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने महान् महान्तौ महान्तः हे महन् महतः महता महद्भ्याम् अत्वस
न्तस्य चाधातोः अत्वन्तस्योपधाया दीर्घो धातुभिन्नासन्तस्य चासंबुद्धौ सौ परे नित्यं च न सेवापि तावचनसामर्थ्याद्दासो दीर्घः
धीमान् धीमन्तौ हे धीमन् शसादौ महद्वत् भातेर्डवतुः डित्वसामर्थ्यादभस्यापि टेर्लोपः भवान् भवन्तौ शत्रन्तस्य भव
न् उभे अभ्यस्तं षाष्ठद्वित्वप्रकरणे ये विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः नाभ्यस्ताच्छतुः अभ्यस्तात्परस्य शतुर्नुम् न ददत्।
ददतौ जक्षित्यादयः षट् षड्धातवोऽन्ये जक्षितिश्च अभ्यस्तसंज्ञाः स्युः जक्षत् जक्षतौ एवं जाग्रत् दरिद्रत् शास
त् चकासत् दीध्यत् वेव्यत् गुप् गुप् गुपौ गुब्भ्यां त्यदादिषु दृशोऽनालोचने कञ्च त्यदादिषूपपदेष्वज्ञाना।
र्थाद् दृशेः कञ् चात् क्विन् आ सर्वनाम्नः सर्वनाम्न आकारोऽन्तादेशः स्यात् दृग्दृशवतुषु परेषु तादृक् तादृग् तादृशौ ९

नाहभ्यां नाहत्सु: व्रश्चेतिषः जश्त्वम् विट् विड् विशौ विड्भ्यां विट्सु विट्त्सु नशेर्वा नशेः कवर्गादेशो वा पदां-
ते नक् नग् नट् नड् नग्भ्यां नड्भ्यां ऊत्वात् पूर्वं जश्त्वेन ड: गः कः षात्पदान्तात् नट्सु नट्त्सु स्पृशोऽनुदके क्विन् स्पृ।
नुदके स्पृशुपपदे स्पृशेः क्विन् स्यात् घृतस्पृक् घृतस्पृग् घृतस्पृशौ घृतस्पृग्भ्यां घृतस्पृक्षु दधृक् दधृग् दधृ॥
ग्भ्यां दधृक्षु रत्नमुट् रत्नमुषौ रत्नमुषः रत्नमुड्भ्यो रत्नमुट्सु रत्नमुट्त्सु षट् २ षड्भिः षड्भ्यः २ षण्णां षट्सु॥
षट्त्सु रुत्वं प्रतिषत्वस्यासिद्धत्वात् ससजुषो रुरिति रुत्वम् र्वोरुपधाया दीर्घ इकः रेफवान्तस्य धातोरुपधाया इ।
को दीर्घः पदान्ते पिपठीः पिपठिषौ पिपठीर्भ्याम् नुम् विसर्जनीयशर्व्यवायेपि पिपठिषौ पिपठीर्भ्यां नुम्
विसर्जनीयशर्व्यवायेपि षत्वं मत्वेकवचनेपील् ऊर्भ्यां परस्य सस्य मूर्धन्यादेशः ष्टुत्वेन ष्टुत्वस्यासिद्धत्वात्।
ष्षु पिपठीःषु चिकि: चिकीर्षौ चिकीर्षु विद्वान् विद्वांसौ विद्वांसः हे विद्वन् वसोः संप्रसारणं व-
स्वन्तस्य भस्य संप्रसारणं स्यात् विदुषः वसुस्रंसुध्वंस्वनडुहां दः विद्वद्भ्यां पुंसोऽसुङ् सर्वनामस्थाने पुमान् हे पुमन् पुमां-
सौ पुंसः पुंभ्यां पुंसु ऋदुशनस्पुरुदंसोऽनेहसां च उशना उशनसौ अस्य संबुद्धौ वानङ् नलोपश्च वा वाच्यः हे उशनन् हे उश-
न हे उशनः उशनोभ्यां अनेहा अनेहसौ हे अनेहः वेधाः वेधसौ हे वेधः वेधोभ्यां अदस औ सुलोपश्च अद-
स औ स्यात् सोः सुलोपश्च तदोः सः सावनन्त्ययोः असौ औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः प्रतिषेधपक्षे साकच्च अ-
सकौ असुकः अदसोऽसेर्दादु दो मः अदसो दात्परस्य उदूतौ स्तो दस्य मश्च आन्तरतम्यात् ह्रस्वस्य ह्रस्वः दीर्घस्य दी-
र्घस्य ऊः अमू जसः शीः गुणः एत ईद्बहुवचने अदसो दात्परस्यैत ईत् स्यात् बहुवचनेक्तौ अमी एत्वस्यासिद्ध।

किमितिविभक्तिकार्यं प्राक् पश्चादुत्वमत्वे अमुंअमूअमून् मुत्वेकृतेघिसंज्ञायांनाभावः नमुने नाभावेकर्त्तव्येकृ
ल कौ तेचमुभावोनासिद्धः अमुना अमूभ्यां अमीभिः अमुष्मैअमीभ्यः अमुष्मात् अमुष्यअमुयोः अमीषांअमुष्मिन् अमी
१८ षु इतिहलन्ताः पुंलिंगाः ॥ नहोधः नहोहकारस्यधःस्यात् झलिपदान्तेच नहिवृतिवृषिव्यधिरुचिसहितनिषु ॥
क्वौ किंवतेपूर्वपदस्यदीर्घः उपानत् उपानहौ उपानहः उपानद्भ्यां उपानत्सु उष्णिक् उष्णिहौ उष्णिग्भ्यां द्यौः
दिवौ द्युभ्यां गीः गिरौगिरः गीर्भ्यां गीर्षु पूः पुरौ पूर्भ्यां चतस्रः चतसृणां काकेकाः सर्ववत् यःसौ इदमोदस्ययःसौ
इदमोमः इयंत्यदाद्यत्वेपररूपत्वेटाप् दश्चेतिमः इमेइमाः इमांइमेइमाः अनयाहलिलोपः आभ्यांआभिः अस्यैअस्याः
अनयोः आसाम् अस्याम् अनयोः आसु स्रक् स्रजौ स्रजः स्रग्भ्याम्त्यदाद्यत्वे टाप्स्यास्येत्याः वाक् वाग्वाचौ वा
ग्भ्याम् अपशब्दोनित्यम् बहुवचनान्तः अप्तृन्नितिदीर्घः आपः अपः अपोभि अपस्तकारोभादौप्रत्यये अद्भिःअ
द्भ्यः अप्सुदिक् दिशौ दिशः दिग्भ्यां त्यदादिष्वितिदृशेःक्विन्विधानादन्यत्रापिकृतं दृक् दृशौदृग्भ्यांत्विड्त्विषौ ॥
त्विड्भ्यांससजुषोरुरितिरुत्वंसजूः सजुषौ सजूर्भ्यांआशीः आशिषौ आशीर्भ्यां असौ उत्वमत्वे अमूअमूः अमू
अमुया अमूभ्यां ३अमूभिः अमुष्यै अमूभ्यः २ अमुष्याः अमुयोः २ अमूषां अमुष्यां अमुयोः अमूषु इतिह।
लन्ताःस्त्रीलिंगाः स्वमोर्लुक् वसुस्रंसुध्वंस्वनडुहांदइतिदत्वे स्वनडुत् स्वनडुही चतुरनडुहोरित्याम् स्व
नड्वांहि इत्यनस्वत् शेषंपुंवत्वाः वारी वारि वारावार्भ्यांचत्वारि २ किंकेकानि इदंइमे इमानि ब्रह्म।
संबुद्धौनपुंसकानांनलोपोवावक्तव्यः हेब्रह्महेब्रह्मन् ब्रह्मणी ब्रह्माणि रोसुपिअहः विभाषाङिश्योः १८

अह्नी अहनी अहानि अहन् अहर्विसस्सरुः स्यात्पदांते अहोभ्यां दंडि दंडिनी दंडिनी सपथि दिलो।
पः सुपथी सुपंथानि ऊर्क् ऊर्जी ऊर्न्जि नरजानां संयोगात्पन् त्येत्यानि तत् तेतानि यत् येयानि ए।
तत् एते एतानि गिरवाक् गोची गवांचि भनस्तहन् गोवाग् गवाभ्यां शकृत् शकृती शकृंति शकृद्भ्यां
ददत् ददती वा नपुंसकस्य अभ्यस्तात् क्लीबात्परस्य शानुर्वा नुम् सर्वनामस्थाने ददंति ददाति तुदत्
आच्छीनद्योर्नुम् अवर्णात्परोयः शतुरवयवस्तदंतांगस्य नुम् वा शीनद्योः तुदंती तुदती तुदंति भा।
त् भांती भाती भांति पचत् शप्श्यनोर्नित्यं शप्श्यानोरात्परोयः शतुरवयवस्तदंतस्य नुम् शीनद्योः
पचंति दीव्यत् दीव्यंती दीव्यंति धनुः धनुषी सान्तेतिदीर्घः नुम् विसर्जनीयेतिषः धनूंषि धनुषा ध
नुर्भ्यां एवं चक्षुर्हविरादयः पयः पयसी पयांसि पयसा पयोभ्यां सुपुम् सुपुंसी सुपुमांसि अदः
विभक्तिकार्यं उत्वमत्वे अमू अमूनि शेषं पुंवत् इति हलंताः क्लीबाः स्वरादिनिपातमव्ययम् ॥:
स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः स्वर् अंतर् प्रातर् सनुतर् उच्चैस् शनैस् ऋधक् ऋते युगपत् आ
रात् ॥: पृथक् ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् चिरंमनाक् ईषत् जोषं तूष्णीं बहिस् अवस् सम
या निकषा स्वयं वृथा नक्तं नञ् हेतौ इद्धा अद्धा सामि वत् ब्राह्मणवत् क्षत्रियवत् सनात् सनत् सना
त् तिरस् अंतरा अंतरेण ज्योक् कं शं सहसा विना नाना स्वस्ति स्वधा अलं वषट् श्रौषट् वौषट्।
अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मृषा मिथ्या मुधा पुरा मिथो मिथस् प्रायस् मुहुस् प्र।

वाङ्कं ॥ अवाहिका आर्घहले अभीक्ष्णं साकं सार्धं नमस् हिरुक् धिक् अथ अम् आम् प्रताम् प्रशान् प्रमान् ।
ल कौ मामाङ् आकृतिगणोयं चवाहा अह एव एवं नूनं शश्वत् युगपत् भूयस् कूपत् वत् कुवित् नेत्चेत् चण् यत्र
१९ कच्चित् नह हन्त माकिः नकिः माकीं माङ् नञ् यावत् तावत् त्वै द्वै न्वै रै श्रौषट् स्वाहा स्वधा वषट् तम् तथाहि खलु ॥
किल अथ सुष्ठु स्म आदह उपसर्गविभक्तिस्वरप्रतिरूपकाश्च अवदत्तं अहंयुः अस्तिक्षीरा अ आ इ ई उ ऊ ए ऐ ओ औ
पशु शुकं यथाकथाच पाट् प्याट् अंग है हे भोः अये द्य विषु एकपदे युत् आतः चादिरप्याकृति
गणः नहितश्चासर्वविभक्तिः यस्मात् सर्वविभक्तिर्नोत्पद्यते स ततेहितो नो अव्ययं स्यात् परिगणः ॥
तेकृतेव्यं तसिलादयः प्राक्पाशपाः शस् प्रभृतयः प्राक् समासान्तेभ्यः अम् आम् कृत्वोर्थाः तसि
वती नान ञाविति अतः इत्यादि कृन्मेजन्तः कृयोमीत एजन्तश्चतदेतमव्ययं स्मारं स्मारं जीवसे पिब
ध्यैत्क्वातो सुन्कसुनः एतदन्तमव्ययं कृत्वा उदेतोः विसृपः अव्ययीभावश्च अपिहारि अव्यया ॥
दास्यपः अव्ययादाप्सुपः स्यपश्च लुक् स्यात् तत्र शालायां ॥ अव्ययसदृशं त्रिषु लिंगेषु सर्वा ।
सु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः टापं चै ।
व हलंतानां यथा वाचा निशा दिशा वगाहः अवगाहः पिधानं ॥ अपिधानं ॥ इत्यव्ययानि ॥

इति श्री महरदराजविरचितायां लघुसिद्धान्तकौमुद्यां अव्ययानाम्
वीहिः समाप्तः ॥

ढक्कगं वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हलन्तानां यथा वाचा निशा दि
शा २ अगाहः अवगाहः पिधानं अपिधानं इत्यव्ययानि ॥ नमो विघ्नहर्त्रे ॥ अथ
तिङन्ते ॥ लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ्. एषां पञ्चमो लकारश्छन्दो
मात्रगोचरः लः कर्मणि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्मणि वा कर्तरि च स्युः अ
कर्मकेभ्यो भावे कर्तरि च वर्तमाने लट् अटौ इतौ उच्चारणसामर्थ्याल्लस्य नेत्त्वं लस्य अ
धिकारोयं अस्मज्ज्ञायां कर्तरि विवक्षायां ल्लस्य तिप् तस् झि सिप् थस् थ मिप् व
स् मस् त आतां झ थास् आथां ध्वम् इट् वहि महिङ् इत्यष्टादश लस्यादेशाः स्युः।
लः परस्मैपदं लादेशाः परस्मैपदसंज्ञाः स्युः तङानावात्मनेपदं तङ् प्रत्याहारः शानच्
कानचौ चात्मनेपदसंज्ञौ स्तः सर्वसंज्ञापवादः अनुदात्तङित आत्मनेपदं अनुदात्तेत् उपदेशे
यो ङित् तदन्ताच्च धातोर्लस्यात्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले स्वरितेतो ञि
तश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले शेषात्कर्तरि परस्मैपदं आत्मनेपदनि
मित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः तिङ३

भयोः परयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विवचनबहुवचनान्येकैकशः प्रथ
लध्यप्रथमादिसंज्ञानि तिङः त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः युष्मद्युपपदे
समानाधिकरणे स्थानिन्यपि मध्यमः तिङ्वाच्यकारकवाचिनि युष्मद्युपपदे प्रयुज्य
माने प्रयुज्यमानेऽपि मध्यमपुरुषः स्यात् अस्मद्युत्तमः तथाभूतेऽस्मद्युत्तमाः शेषे प्रथमः
भू ति इति जाते तिङ्शित्सार्वधातुकं तिङः शितश्च सार्वधातुकसंज्ञाः कर्तरि शप् कर्त्र
र्थे सार्वधातुके धातोः शप् सार्वधातुकार्धधातुकयोः अनयोः परयोरिगन्तस्य गुणः अ
वादेशाः भवति भवतः झोऽन्तः प्रत्ययावयवस्य झस्यान्तादेशः स्यात् अतो गुणे भवन्ति भ
वसि भवथः भवथ अतो दीर्घो यञि अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके परे भवामि
भवावः भवामः स भवति तौ भवतः ते भवन्ति त्वं भवसि युवां भवथः यूयं भवथ ।
अहं भवामि आवां भवावः वयं भवामः शेषे विभाषाऽकखादावषान्त उपदेशे उपदेशे
कादि खादि षान्तवर्जे गादनदादेरस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य णत्वं वा
स्यात् प्रनिभवति प्रणिभवति परोक्षे लिट् भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् २

लस्याने णादयः लिट् च लिङाशिषि आर्धधातुकसंज्ञः स्यात् तेन ण[?]दयो न परस्मै
पदानां णलतुसुस्थलथुसणल्वमाः लिटस्तिबादीनां णलादयः स्युः भूव इति स्थिते राम
भुवो वुग्लुङ्लिटोः अचि लिटि धातोरनभ्यासस्य लिटि परे अनभ्यासस्य धातोरवयवस्यैका
चः प्रथमस्य द्वे स्तः आदिभूतादचः परस्य तु द्वितीयस्य भूव् भूव् इति स्थिते पूर्वोऽभ्यासः
अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् हलादिः शेषः अभ्यासस्यादिर्हल् शिष्यते ।
अन्ये हलो लुप्यन्ते ह्रस्वः अभ्यासस्याचो ह्रस्वः स्यात् भवतेरः भवतेरभ्यासोकारस्य अः स्या
त् भवतेरः भवतेरभ्यासोकारस्य अः स्यात् लिटि अभ्यासे चर्च अभ्यासे झलां चरः स्युः
जशश्च कशां न शः खयां चर इति विवेकः बभूव बभूवतुः बभूवुः आर्धधातुकस्येड्
वलादेः वलादेरार्धधातुकस्येट् स्यात् बभूविथ बभूवथुः बभूव बभूव बभूविव बभूविम
अनद्यतने लुट् भविष्यत्यनद्यतनेर्थे धातोर्लुट् स्यात् स्यतासी लृलुटोः धातोरेतौ स्तः लृ
लुटोः परतः शबाद्यपवादः लृ इति लृङ्लृटोर्ग्रहणं आर्धधातुकं शेषः तिङ्शिद्भ्योऽन्यो धा
तोरिति विहितः प्रत्ययस्तत्संज्ञः २८ लुटः प्रथमस्य डारौरसः डित्वसामर्थ्यादभस्यापि

ल॰ कौ॰ ४१

टेर्लोपः भविता तासस्त्योर्लोपः सः सेरीप्रत्ययेपरे रिच डारौ प्रत्यये तथा भवितारौ भवितारः भ
वितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः लृट् शेषे च भविष्यदर्थाद्धा
तोर्लृट् स्यात् क्रियार्थायां क्रियायामसत्यां सत्यां च भविष्यति भविष्यतः भविष्यंति भविष्यसि
भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः लोट् च विध्याद्यर्थेषु धातोर्लोट् स्या
त् आशिषि लिङ्लोटौ एरुः लोट इकारस्य उः भवतु तुह्योस्तातङ्ङाशिष्यन्यतरस्यां आशिषित
योस्तातङ् वा परत्वात्सर्वादेशः भवतात् ङित्वाल्लङ्वत् लोटस्तामादयः सलोपश्च तस्य स्थामि
पां तांतंतामः ङितः चतुर्णां तामादयः स्युः भवतां भवंतु सेर्ह्यपिच्च लोटः सेर्हिः सोऽपिच्च
अतो हेः अतः परस्य हेर्लुक् भव भवतात् भवतं भवत मेर्निः लोटो मेर्निः स्यात् आडुत्तमस्य
पिच्च लोडुत्तमस्याट् स्यात् सपिच्च भवानि नित्यं ङितः सकारान्तस्य ङिदुत्तमस्य नित्यं सलोपः अलोऽन्त्य
स्य नित्यं सलोपः भवाव भवाम अनद्यतने लङ् अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् लुङ्लङ्लृङ्क्ष्वडु लङ्
दात्तः एष्वंगस्याट् इतश्च ङितो लस्य परस्मैपदमिकारान्तस्य लोपः अभवत् अभवतां
अभवन् अभवः अभवतं अभवत अभवं अभवाव अभवाम विधिनिमंत्रणामंत्रणाधीष्ट ४१

प्रेषणं निमंत्रणं नियोगकरणं अधीष्टः स
त्कारपूर्वको व्यापारः

संप्रश्नप्रार्थनेषु लिङ् एष्वर्थेषु धातोर्लिङ् यासुट् परस्मैपदेषूदात्तो ङिच्च लिङः परस्मैपदानां
यासुडागमो ङिच्च लिङः सलोपोऽनन्त्यस्य सार्वधातुकलिङः अनन्त्यस्य सस्य लोपः इति प्राप्ते
अतो येयः अतः परस्य सार्वधातुकावयवस्य यास् इत्यस्य इय् गुणः लोपो व्योर्वलि वकारस्य
वाययोर्लोपो वलि भवेत् भवेतां झेर्जुस् लिङः झेर्जुस् स्यात् भवेयुः भवेः भवेतं भवेत भ
वेयं भवेव भवेम लिङाशिषि आशिषि लिङस्तिङार्धधातुकसंज्ञः स्यात् किदाशिषि आशि
षि लिङो यासुट् कित् स्कोरिति सलोपः क्ङिति च किति ङिति निमित्ते इक लक्षणे गुणवृद्धी न
स्तः भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म लुङ् भूतार्थे
धातोर्लुङ् स्यात् माङि लुङ् सर्वलकारापवादः स्मोत्तरे लङ् च स्मोत्तरे माङि लङ् स्यात् चा
त् लुङ् च्लि लुङि शपाद्यपवादः च्लेः सिच् गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु एभ्यः सि
चो लुक् परस्मैपदेषु गापाविहेणादेशापिबती गृह्येते भूसुवोस्तिङि भूसुवोरिको न तयोः सार्व
धातुकेतिङि गुणो न अभूत् अभूतां अभूवन् अभूः अभूतं अभूत अभूवं अभूव अभूम ना
माङ्योगे अट् आटौ न स्तः मा भवान् भूत् मा स्म भवत् मा स्म भूत् लिङ्निमित्ते लृङ् क्रियाति

पक्षे हेतुहेतुमद्भावादि लिङ्निमित्तं यत्र तत्र भविष्यदर्थे लृङ् क्रियायामनिष्पत्तौ गम्यमानायां।
अभविष्यत् अभविष्यतां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याव अभ
विष्याम अत सातत्यगमने अतति अत आदेः अभ्यासस्यादेरतो दीर्घः स्यात् आत आततुः आतुः आ
तिथ आतथुः आत आत अतिव अतिम अतिता अतिष्यति अततु आडजादीनां अजादेरंग
स्याट् लङ्लङ्लृङ्क्षु आतत् आतताम् आतन् लुङि सिचि इडागमे कृते अस्ति सिचोऽपृक्ते विद्यमा
नात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः इट ईटि इटः परस्य सस्य लोपः स्यात् ईटि सिज्लोपएक
कादेशे सिद्धो वक्तव्यः आतीत् आतिष्टां सिजभ्यस्तविदिभ्यश्च सिचोऽभ्यस्तात् विदेश्च परस्य ङित्स
म्बन्धिनो झेर्जुस् आतिषुः आतीः आतिष्टं आतिष्ट आतिषं आतिष्व आतिष्म आतिष्यत् षि
धु गत्यां ह्रस्वं लघु संयोगे गुरुः संयोगे परे ह्रस्वं दीर्घं च गुरुः स्यात् पुगन्तलघूपधस्य च पुगन्त
स्य लघूपधस्य चाङ्गस्य गुणः सार्वधातुकार्धधातुकयोः धात्वादेः षः सः सेधति षत्वं सिषेध
असंयोगाल्लिट् कित् असंयोगात् परोऽपित् लिट् कित् स्यात् सिषिधतुः सिषिधुः सिषेधिथ सिषिधथुः।
सिषिध सिषेध सिषिधिव सिषिधिम सेधिता सेधिष्यति सेधतु असेधत् सेधेत् सिध्यात् अ

वहति

स्पीत् अगदिष्यत् एवं सुप्रशाके गद व्यक्तायां वाचि गदति नेर्गदनदपतपदघुमास्यतिहन्ति
यातिद्रातिप्सातिवपतिशाम्यतिचिनोतिदेग्धिषु च उपसर्गस्थान्निमित्तात् परस्य नेर्णः स्यात् ग
दादिषु परेषु प्रणिगदति कुहोश्चुः अभ्यासस्य कवर्गहकारयोश्चवर्गादेशः अत उपधायाः उपधा
याः अतो वृद्धिः स्यात् ञिति णिति प्रत्यये जगाद जगदतुः जगदुः जगदिथ जगदथुः जगद
णलुत्तमो वा उत्तमो णल् वा णित् जगाद जगद जगदिव जगदिम गदिता गदिष्यति गदतु।
अगदत् गदेत् गद्यात् अतो हलादेर्लघोः हलादेर्लघोरतो वृद्धिर्वा इडादौ परस्मैपदे सिचि अ
गादीत् अगदीत् अगदिष्यत् णद अव्यक्ते शब्दे णो नः धात्वादेर्णस्य नः स्यात् नदति णोपदेशाः
त्वनर्द्दिनन्दिनाथनाधनन्दनक्कनॄनृतः उपसर्गादसमासेऽपि णोपदेशस्य उपसर्गस्थान्निमित्तात्
परस्य णोपदेशस्य धातोर्नस्य णः स्यात् असमासे समासेऽपि प्रणदति ननाद अत एकहल्मध्ये
नादेशादेर्लिटि लिट्निमित्तादेशादिकं न भवति यदंगं तदवयवस्याऽसंयुक्तहल्मध्यस्थस्यातए
त्वमभ्यासलोपश्च किति लिटि नेदतुः नेदुः थलि च सेटि इत्युक्तिर्थलि च प्रागुक्तं स्यात् नेदिथ
नेदथुः नेद ननाद नेदिव नेदिम नदिता नदिष्यति नदतु अनदत् नदेत् नद्यात् अनादीत्

ल॰ कौ॰ २३

अनदीत् अनदिष्यत् टुनदि समृद्धौ आदिर्ञिटुडवः उपदेशे धातोराद्या एते इतः स्युः इदितो नुम्धा इ
दितो धातोर्नुम् स्यात् नंदति ननंद नंदिता नंदिष्यति नंदतु अनंदत् नंदेत् इदित्वान्नलोपो न
नंद्यात् अनंदीत् अनंदिष्यत् एवं वदि अभिवादनस्तुत्योः भदि कल्याणे सुखे च मदि स्तुतिमो
दमदस्वप्नकान्तिगतिषु अर्च पूजायां अर्चति तस्मान्नुड् द्विहलः द्विहलो धातोर्दीर्घीभूतादतः
परस्य नुट् स्यात् आनर्च आनर्चतुः आनर्चुः अर्चिता अर्चिष्यति अर्चतु आर्चत् अर्चेत् अर्च्या
त् आर्चीत् आर्चिष्यत् व्रज गतौ व्रजति वव्राज व्रजिता व्रजिष्यति व्रजतु अव्रजत् व्रजेत् व्रज्यात्
वदव्रजहलन्तस्याचः एषामचो वृद्धिः सिचि परस्मैपदे अव्राजीत् अव्रजिष्यत् कटे वर्षावरण
योः कटति चकाट कटिता कटिष्यति कटतु अकटत् कटेत् कट्यात् ह्म्यन्तक्षणश्वसजागृ
णिश्व्येदितां ह्मयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्नेडादौ सिचि अकटीत् अक
टिष्यत् गुपू रक्षणे गुपूधूपविच्छिपणिपनिभ्य आयः स्वार्थे सनाद्यन्ता धातवः सनादयः
कामेणिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ
तथा यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः धातुत्वाल्लडादयः गोपायति आयादय आ

धातुकेऽचा आर्धधातुकस्य विवक्षायामात्मनेपदयोर्वास्यः कास्यनेकाच आम् वक्तव्यः लिटि आ
मोऽमित्वमदंतत्वात्गुणत्वं विदेस्तथा आस्कामेषामियधातोरपरत्वं पंकतं तेवात् कासपा
मियधातोरामस्यानेनत्वं अतोलोपः आर्धधातुकोपदेशे यददंतं तस्यातोलोपः आर्धधातुके आ
मः आमः परस्य लुक् कृञ्चानुप्रयुज्यते लिटि आमंताद्विरपराः कृभ्वस्तयोनुप्रयुज्यंते तेषां
द्वित्वादि उरत् अभ्यासस्य अतोनात् अचो ञ्णिति गोपायांचकार द्वित्वापरत्वाचाणि प्राप्ते
द्विर्वचनेऽचि द्वित्वनिमित्तेऽचि अजादेशो न द्वित्वे कर्तव्ये गोपायांचक्रतुः गोपायांचक्रुः एका
च उपदेशेऽनुदात्तात् उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येट् न।
उ॰ ८ कृदंतं तेऽपि न इत्यत्र पाठः श्लोकाः शिष्ट्वा ऊर्ध्वमिः वृङ्वृञ्भ्यां च विनैकाचोऽजंतेषु निहिताः स्मृ
कः तः कांतेषु शाकल्ये चांतेषु पच् मुच् रिच् वच् विच् सिचः षट् छांतेषु प्रच्छ एकः जांतेषु।
४ त्यज् निजिर् भंज् भुज् भ्रस्ज् मस्जि यज् युज् रुज् रंज् विजिर् स्वञ्जि सञ्ज सृजषट्दश दां
तेषु अद् क्षुद् खिद् छिद् तुदि नुद् पद् भिद् विद् स्कंद् हद् शद् छिद् ग्रेपादश धांतेषु
क्रुध् क्षुध् बुध् बंधि युधि रुध् राध् व्यध् शुध् साधु सिधः एकादश नांतेषु मन् हन् द्वौ

पांतेषु आपॢ दिपृ कपि नभ तिपृ ष्टपि तृप्यति लिपृ लपृ वप शप स्वपृ स्वपस्तयोऽदशामां
तेषु गम् नम् यम् रमश्चत्वारः भांतेषु यभ् रभ् लभस्त्रयः शांतेषु क्रुश दंश दिश दृश मृश
रिश रुश लिश विश स्पृशो दश षांतेषु त्विष् तुष् द्विष् दुष् पुष् पिष् विष्लृ शिष् शुष्
कृष् श्लिषः एकादश सांतेषु वसघसौ द्वौ हांतेषु दह दिह दुह नह मिह रुह लिह व
ह् अष्टौ अनुदात्ताः हलंतेषु धातवो व्यधिकं पाते गोपायांचकर्थ गोपायांचक्रथुः गोपायांचक्र
गोपायांचकार गोपायांचकार गोपायांबभूव गोपायांचकृम गोपायामास गोपायांबभूव ।
पक्षे जुगोप जुगुपतुः जुगुपुः स्वरतिसूतिसूयतिधूञ् ऊदितो वा स्वरत्यादेरूदितश्च परस्य वला
देरार्धधातुकस्येड्वा जुगोपिथ जुगोप्थ गोपायिता गोपिता गोप्ता गोपायिष्यति गोपिष्यति गो
प्स्यति गोपायतु अगोपायत् गोपायेत् गोपाय्यात् गुप्यात् अगोपायीत् अगोपीत् अति
टादौ सिचि वृद्धिः अगौप्सीत् झलो झलि झलः परस्य सस्य लोपो झलि अगौप्तां अगौप्सुः अगौ
प्सीः अगौप्तं अगौप्त अगौप्सं अगौप्स्व अगौप्स्म अगोपायिष्यत् अगोपिष्यत् अगोप्स्यत् ।
ष्ठिवु ष्ठीवति टिष्ठेव टिष्ठिवतुः टिष्ठिवुः एकाच इति निषेधे प्राप्ते कृसृभृवृस्तुद्रुस्रुश्रुवो

ततः परस्य थल इटो न उपदेशेऽत्वतः उपदेशे अकारवतो तासौ नित्यानिटः परस्य थल इटो न
ऋतो भारद्वाजस्य तासौ नित्यानिटः अस्य अंतादेव थलो नेट्।

लिटि आदिरुपधलिटि ह्रस्वात् अन्यस्मादनिटोऽस्मात् अचलादस्मात् निरोऽनित्यं उपदेशोऽत्र
जंतोऽयोधातुः तासौ नित्यानिटः अस्य अंताद्वथलो नेट् भारद्वाजस्य मते नान्यस्य चिचयिथ चिचे
थ चिचियथुः चिचिय चिचाय चिचय चिचियिव चिचियिम चेता चेष्यति चयतु अचयत् च
येत् अकृत्सार्वधातुकयोर्दीर्घः अजंतांगस्य दीर्घो यादौ प्रत्यये न कृत्सार्वधातुकयोः चीयात्
सिचि वृद्धिः परस्मैपदेषु इगंतांगस्य वृद्धिः परस्मैपदे सिचि अचैषीत् अचेष्यत् तप संतापे तप
ति तताप तेपतुः तेपुः तेपिथ ततप्थ तप्ता तप्स्यति तपतु अतपत् तपेत् तप्यात् अताप्सी
त् अतप्तां अतप्स्यत् ॥ क्रमु पादविक्षेपे वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः श्यः श्यन्वा
कर्तरि सार्वधातुके परे एषु क्रमः परस्मैपदेषु क्रमे दीर्घः परस्मैपदे शिति क्राम्यति क्रामति
चक्राम क्रमिता क्रमिष्यति क्राम्यतु क्रामतु अक्राम्यत् अक्रामत् क्राम्येत् क्रामेत् क्रम्या
त् अक्रामीत् अक्रमिष्यत् पा पाने पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमति
ष्ठमनयच्छपश्यर्च्छधौशीयसीदाः पादीनां पिबादयः स्युः इत्संज्ञकशादौ प्रत्यये परे पिबादे
शोऽदंतत्वेन गुणेन पिबति आतो णल औः ॥ आदंताद्धातोः णल औ स्यात् पपौ आतो लोप इटि च

ल॰ कौ॰ २५

सृ णायोरार्धधातुकयोः क्ङिति इटोरचोरातोलोपः पपतुः पपुः पपिथ पपाथ पपथुः पप पपौ प
पिव पपिम पाता पास्यति पिबतु अपिबत् पिबेत् दाधाघ्वदाप् दाङ्रूपाधाङ्रूपाश्च धातवो घुसं
ज्ञाः स्युः दाप् दैपौ विना एर्लिङि ॥ घुसंज्ञानां मास्थादीनां च एत्वं स्यात् आर्धधातुके किति लि
ङि च परे पेयात् गातिस्थेति सिचो लुक् अपात् अपातां ॥ आतः सिचि लुकि आदन्तादेव झो
र्जुस् उसि अपदान्तात् [illegible] उसि पररूपमेकादेशः अपुः अपास्यत् ग्लै म्लै हर्षक्षये
ग्लायति आदेच उपदेशेऽशिति उपदेशे एजन्तस्य धातोरात्वं स्यात् न तु शिति जग्लौ ग्लाता ग्ला
स्यति ग्लायतु अग्लायत् ॥ वान्यस्य संयोगादेः घुमास्थादेरन्यस्य संयोगादेरातः एत्वं वा स्यात्
आर्धधातुके किति लिङि ग्लायात् ग्लेयात् यमरमनमातां सक् च एषां सक् एभ्यः सिच इट् स्यात् ।
परस्मैपदेषु अग्लासीत् अग्लास्यत् ह्वृ कौटिल्ये ह्वरति ऋतश्च संयोगादेर्गुणः ऋदन्तस्य संयोगादे
र्गुणस्य गुणो लिटि उपधावृद्धिः जह्वार जह्वरतुः जह्वरुः जह्वर्थ जह्वरथुः जह्वर जह्वार जह्वर ज
ह्वरिव जह्वरिम ह्वर्ता ऋद्धनोः स्ये ऋतो हन्तेश्च स्य इट् स्यात् ह्वरिष्यति ह्वरतु अह्वरत् ह्वरेत् ॥
गुणोऽर्तिसंयोगाद्योः अर्तेः संयोगादेः ऋदन्तस्य च गुणः स्यात् यकि यादावार्धधातुके लिङि च ह्वर्यात् २५

ऊर्णुवीत् ऊर्णुविष्यत् ऊर्णुञ् आच्छादने ऊर्णुः ऊर्णोतेर्वा हलादौ पिति सार्वधातुके ऊर्णौति
सार्वधातुकमपित् अपित्सार्वधातुकं ङिद्वत्स्यात् ङित्वान्न गुणः ऊर्णुतः हुश्नुवोः सार्वधातुके
जुहोतेश्च प्रत्ययान्तस्यानेकाचोऽङ्गस्यासंयोगपूर्वो वर्णस्य यण् स्यात् अजादौ सार्वधातुके ऊर्णुवन्ति
ऊर्णोषि ऊर्णुथः ऊर्णुथ ऊर्णोमि लोपश्चास्यान्यतरस्यां म्वोः असंयोगपूर्वस्य प्रत्ययोकारस्य
लोपो वा म्वोः परयोः ऊर्णुवः ऊर्णुवः ऊर्णुमः ऊर्णुमः ऊर्णुनाव ऊर्णुनुवतुः ऊर्णुनुवुः ऊर्णुनविथ ।
ऊर्णुनुवथुः ऊर्णुनुव ऊर्णुनाव ऊर्णुनव ऊर्णुनुविव ऊर्णुनुविम ऊर्णुविता ऊर्णुविष्यति ऊर्णोतु ऊर्णुतात् ऊर्णुतां ।
ऊर्णुवन्तु उतश्च प्रत्ययादसंयोगपूर्वात् असंयोगपूर्वात् प्रत्ययोकाराद्धेर्लुक् ऊर्णु ऊर्णुतात् ।
ऊर्णुतं ऊर्णुत ऊर्णवानि ऊर्णवाव ऊर्णवाम और्णोत् और्णुतां और्णुव और्णुम और्णुम ऊ
र्णुयात् ऊर्णुयातां उस्य पदान्तात् २ ऊर्णुयुः ऊर्णुयाः ऊर्णुयातं ऊर्णुयात ऊर्णुयां ऊ
र्णुयाव ऊर्णुयाम ऊर्णूयात् ऊर्णूयास्तां ऊर्णूयासुः और्णावीत् और्णुविष्यत् गम्लृ गतौ इषुगमि
यमां छः यमां छः स्यात् शिति गच्छति जगाम गमहनजनखनघसां लोपः क्ङित्यनङि जग्मतुः
जग्मुः जगमिथ जगन्थ जग्मथुः जग्म जगाम जगम जग्मिव जग्मिम गन्ता गमेरिट् परस्मैप

पा ८

ल० कौ० २८

टितो लस्य आत्मनेपदानां टेरे

देशु गमिष्यति गच्छतु अगच्छत् गच्छेत् गम्यात् पुषादिद्युताद्यॢदितः परस्मैपदेषु च्लेरङ् स्यात् अ
गमत् अगमिष्यत् । इति परस्मैपदप्रक्रिया एध वृद्धौ इति आत्मनेपदानां टेरेत्वं स्यात् एधते आ
तो ङितः आतः परस्य ङित आत इय् एधेते एधन्ते थासः से टितो लस्य थासः सेः स्यात् एधसे एधेथे ।
एधध्वे अतो गुणे एधे एधावहे एधामहे इजादेश्च गुरुमतोऽनृच्छः इजादेर्धातोर्गुरुमान्
अनृच्छत्यस्य लिट्याम् स्यात् लिटि आम्प्रत्ययवत्कृञोऽप्यात्मनेपदं स्यात् लिटस्तझयोरेशिरेच् लि
टः परयोस्तझयोरेशिरेचौ स्तः एधाञ्चक्रे एधाञ्चक्राते एधाञ्चक्रिरे एधाञ्चकृषे एधाञ्चक्राथे
इणः षीध्वंलुङ्लिटां धोऽङ्गात् इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः एधाञ्चकृढ्वे एधाञ्चक्रे ए
धाञ्चकृवहे एधाञ्चकृमहे एधामास एधाम्बभूव एधिता एधितारौ एधितारः एधितासे एधि
तासाथे धि च धादौ प्रत्यये सस्य लोपः एधिताध्वे ह एति तासस्त्योः सस्य हः स्यादेति एधिताहे एधि
तास्वहे एधितास्महे एधिष्यते एधिष्येते एधिष्यन्ते एधिष्यसे एधिष्येथे एधिष्यध्वे एधिष्ये एधि
ष्यावहे एधिष्यामहे आमेतः लोट एत आम् एधताम् एधेताम् एधन्ताम् सवाभ्यां वामौ सवाभ्यां परस्य लो
टः एकारस्य वामौ स्तः एधस्व एधेथाम् एधध्वम् एतै लोडुत्तमस्य एत ऐ एधै एधावहै एधामहै ऐधत

३५ नुप्रयोगस्य आम्प्रत्ययवत्सात समकृप्रयुज मानात्कृञोऽप

ऐधेतां ऐधंत ऐधथाः ऐधेथां ऐधध्वं ऐधे ऐधावहि ऐधामहि लिङः सीयुट् लिङस्यात्मनेपदा
नां सीयुट् सलोपः एधेत एधेयातां झस्यरन् लिङो झस्य रन् एधेरन् एधेथाः एधेयाथां एधेध्वं
इटोऽत् लिङादेशस्येटोऽत् एधेय एधेवहि एधेमहि सुट्तिथोः लिङः तथोस्सुट् एधिषीष्ट ए
धिषीयास्तां एधिषीरन् एधिषीष्ठाः एधिषीयास्थां एधिषीध्वं एधिषीय एधिषीवहि एधिषी
महि ऐधिष्ट ऐधिषातां आत्मनेपदेष्वनतः २ अनकारान्तस्मात्परस्य झस्यात्।
ऐधिषत ऐधिष्ठाः ऐधिषाथां ऐधिढ्वं ऐधिषि ऐधिष्वहि ऐधिष्महि ऐधिष्यत ऐधिष्येताम्
ऐधिष्यंत ऐधिष्यथाः ऐधिष्येथां ऐधिष्यध्वं ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि कमु कांतौ।
कांतिरिच्छा कमेर्णिङ् स्वार्थे कामयते कामयेते कामयंते कामयसे कामयेथे कामयध्वे।
कामये कामयावहे कामयामहे अयामंतान्वाय्येत्निष्णुषु आम् अंत आलु आय्य इत्नु इष्णु
एषु परेषु णेरयादेशः कामयांचक्रे आयादय इति वा चकमे चकमाते चकमिरे चकमि
षे चकमाथे चकमिध्वे चकमे चकमिवहे चकमिमहे कामयिता कमिता कामयिष्यते।
कमिष्यते कामयतां अकामयत कामयेत कामयिषीष्ट कमिषीष्ट णिश्रिद्रुस्रुभ्यः क

या २ स्व २

ल॰ कौ॰ २१

र्तेरिचङ् एपलात श्रिसारिभ्यस्त्रेः चङ् वर्तते लुङि. कामः अत इति सिपेने लोरनिटि अनिटां दावार्ध
धातुकेललोपः णौच सुपधायाः ह्रस्वः चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः चङि. अनभ्यासे धातुवयव
स्य प्रथमस्यैकाचो द्वे स्तः चङि. अजादेस्तु द्वितीयस्य सन्वल्लघुनि चङ्परे नलोपे चङ्परे णौ यदङ्गं त
स्य योऽभ्यासो लघुपरस्तस्य सनीव कार्यं स्यात् णौ अनग्लोपे सति सन्यतः अभ्यासस्यातः इत् सति
दीर्घो लघोः लघोरभ्यासस्य दीर्घः सन्भावविषये अचीकमत णिङभावपक्षे कमेः च्लेश्चङ् वक्तव्यः अच
कमत अकामयिष्यत अकमिष्यत अयगतौ अयते उपसर्गस्यायतौ उपसर्गस्थरेफस्य ल
त्वं स्यात् अयतौ पलायते दयायासश्च एभ्य आम् लिटि अयांचक्रे अयिता अयिष्यते अयतां आ
यत अयेत अयिषीष्ट विभाषेटः इणः परो यः इट् ततः परेषां षीध्वं लुङ्लिटां धस्य वा ढः अयिषीढ्वं
द्यो अयिषीध्वं आयिष्ट आयिष्ट द्युत दीप्तौ द्योतते द्युतिस्वाप्योः सम्प्रसारणं अभ्यासस्य दिद्युते द्यो
तिता द्योतिष्यते द्योततां अद्योतत द्योतेत द्योतिषीष्ट द्युद्भ्यो लुङि. द्युतादिभ्यः परस्मैपदं ।
वा लुङि. पुषादीत्यङ् अद्युतत् अद्योतिष्ट अद्योतिष्यत एवं श्विता वर्णे ञिमिदा स्नेहने ञिक्ष्विदा
स्नेहनमोचनयोः मोहनयोरित्येके ञिविदा इत्येके रुच दीप्तौ अभिप्रीतौ च घुट परिवर्तने । २१

शुभ दीप्तौ। क्षुभ संचलने। णभ तुभ हिंसायां। स्रंसु ध्वंसु भ्रंसु अवस्रंसने। ध्वंसु गतौ च। इमौ वि
भाषितेष्वनुवर्तेते। वृतु वर्तने। वर्तते ववृते वर्तिता। वृद्भ्यः स्यसनोः। द्युतादिभ्यः पंचभ्यो वा परस्मैपदं स्यसनि
न वृद्भ्यश्चतुर्भ्यः। वृतु वृधु शृधु स्यन्दूभ्यः सकारादेरार्धधातुकस्य इट् न तङानयोरभावे
वर्त्स्यति वर्तिष्यते वर्ततां अवर्तत वर्तेत वर्तिषीष्ट अवृतत् अवर्तिष्ट अवर्तिष्यत ददद
ने ददते न शसददवादिगुणानां शसेर्ददेर्वकारादीनां च गुणशब्देन विहितो योऽभ्यासस्य २५
स्य च एत्वाभ्यासलोपौ न। दददे ददृदाने दददिरे ददिता ददिष्यते ददतां अददत ददेत
ददिषीष्ट अददिष्ट अददिष्यत ॥ त्रपूष् लज्जायां त्रपते तॄफलभजत्रपश्च एषामेत्वमभ्या
सलोपश्च किति लिटि सेटि थलि च। त्रेपे त्रपिता त्रप्ता त्रपिष्यते त्रप्स्यते त्रपतां अत्रपत।
त्रपेत त्रपिषीष्ट त्रप्सीष्ट अत्रपिष्ट अत्रप्त अत्रपिष्यत अत्रप्स्यत इत्यात्मनेपदस्थिताः ॥ श्रि
ञ् सेवायां। श्रयति श्रयते शिश्राय शिश्रिये श्रयितासि श्रयितासे श्रयिष्यति श्रयिष्यते श्र
यतु श्रयतां अश्रयत् अश्रयत श्रयेत् श्रयेत श्रीयात् श्रयिषीष्ट अशिश्रियत् अशिश्रियत।
अश्रयिष्यत् अश्रयिष्यत भृञ् भरणे भरति भरते बभार बभ्रतुः बभ्रुः बभर्थ बभृव बभृम।

क॰
को॰
२८

बभ्रे बभृषे भर्तासि भर्तासे भरिष्यति भरिष्यते भरतु भरतां अभरत् अभरत भरेत् भरेत रि
ङ्शयग्लिङ्क्षु शयक्रियाशीर्वादार्थधातुभ्यो लिङ्क्विज्यस्कोरिङ् रीङ् ऋतः इति रिङ्ङादिसामर्थ्यात् दी
र्घो न भ्रियात् उश्च अवर्णान्तपरो कालादी लिसि चाकितो सः नड़ि भृषीष्ट भृषीयास्तां अ
भार्षीत् ह्रस्वादङ्गात् ह्रस्वान्तादङ्गात्सिचो लोपो कालि अभृत अभरिष्यत् अभरिष्यत हृ
ञ् हरणे हरति हरते जहार जहर्थ जहृव जहृम जह्रे जहृषे हर्ता ॰ हरिष्यति हरिष्य
ते अहरिष्यत् धृञ् धारणे धरति धरते णीञ् प्रापणे नयति नयते निनाय डुपचष् पाके प
चति पचते पपाच पेचिथ पपक्थ पेचे पक्ता भज सेवायां भजति बभाज भेजे भक्ता भ
क्ष्यति भजतु भजतां अभाक्षीत् अभक्त अभक्त अभक्षातां यज देवपूजासंगतकरण
दानेषु यजति यजते लिट्यभ्यासस्योभयेषां वच्यादीनां ग्रहादीनां चाभ्यासस्य संप्रसारणं
स्यात् लिटि इयाज वचिस्वपियजादीनां किति वचिस्वप्यर्थयजादीनां च संप्रसारणं किति इ
जे यष्टा षढोः कः से यक्ष्यति यक्ष्यते इज्यात् यक्षीष्ट अयाक्षीत् अयष्ट वह प्रापणे वहति
वहते उवाह ऊहतुः ऊहुः उवहिथ ढो ढे लोपः तथोर्धः ततश्चाते

ढे ढलोपः फपरे फलोपः सहिवहोरोदवर्णस्य ढलोपे उवोढ ऊहे वोढा वक्ष्यति वक्ष्यते अ
वाक्षीत् अवोढां अवाक्षुः अवोढ अवोढां अवोढः अवोक्षं अवक्ष्वहि अवक्ष्महि वेञ् तं
तुसंताने वयति वयते वेञो वयिः वेञो वयिर्वा स्यात् लिटि इकार उच्चारणार्थः उवाय ग्रहिज्या
वयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च एषां किति ङिति संप्रसारणं स्यात्। ति
लिटि ऊयतुः ऊयुः वश्चास्यान्यतरस्यां किति वयो यस्य वो वा स्यात् किति लिटि ऊवतुः ऊवुः
उवयिथ वयादेशाभावे वेञः न संप्रसारणं लिटि ववौ ववतुः ववुः वविथ ववाथ ववे वाता
ऊयात् वासीष्ट अवासीत् अवाह्या अवास्यत इति भ्वादयः ऋतेरीयङ् अस्मात् स्वार्थे ईय
ङ् ऋतीयते ऋतीयांचक्रे आयादय आर्धधातुके वा निपदे आनर्ते आर्तिष्यति आर्तीत।
अथ अदादयः अद भक्षणे अदिप्रभृतिभ्यः शपः लुक् स्यात् अत्ति लिट्यन्यतरस्यां अदो घस्लृ वा स्याल्लिटि।
जघास गमहनेत्युपधालोपः शासिवसिघसीनां च एषां सस्य षत्वं स्यात् जक्षतुः जक्षुः
जघसिथ आद आदतुः इडत्यर्तिव्ययतीनां एषां थलो नित्यं इट् आदिथ अत्ता अत्स्यति अत्तु
अत्तात् हुझल्भ्यो हेर्धिः होर्झलन्तेभ्यश्च हेर्धिः स्यात् अद्धि अदानि अदः सर्वेषां अदः परस्यापृक्तस्य सा

लं॰ कौ॰ ५९

र्धातुकस्याडागमः स्यात् सर्वेषामनेन प्रादत प्रादां प्रयात् नङ्कुसनेनार्द्धहलि अङ्गोपधालोपः स्यात् अक्ङिति

नि च हलि हत्यादाः प्रश्नमन्तः हन हिंसागत्योः हन्ति अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो

झलि क्ङिति अनुनासिकान्तानामेषां वनतेस्तनोत्यादेश्च लोपः स्यात् झलादौ क्ङिति यमिरमिनमिगमि

हनिमन्यतयोऽनुदात्तोपदेशाः तनु षणु क्षणु ऋणु तृणु घृणु वनु मनु तनोत्यादयः हतः घ्नन्ति वधो

वो उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा प्रहण्मि प्रहन्मि प्रहण्वः प्रहन्वः जघान जघ्न

तुः जघ्नुः अभ्यासाच्च अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् जघनिथ जघन्थ जघ्नथुः जघ्न जघान

जघन जघ्निव जघ्निम हन्ता हनिष्यति हन्तु हतात् हतां घ्नन्तु हन्तेर्जः हौ परे असिद्धवदत्राभा

त् इत्यनुवर्त्तमाने आपादपरिसमाप्तेरभीयं समानाश्रये तस्मिन् कर्त्तव्ये तदसिद्धमिति जस्यासिद्धत्वे

हेर्न लुक् जहि हनानि हतं हत हनानि हनाव हनाम अहन् अहतां अघ्नन् अहन् अहतं अ

हत अहनं अहन्व अहन्म हन्यात् आर्धधातुके इत्यधिकृत्य हनो वध लिङि लुङि च वधा

देशोऽदन्तः वध्यात् वध्यास्तां वध्यासुः अवधीत् अवधिष्टां अवधिषुः अहनिष्यत् यु मिश्रणा

मिश्रणयोः उतो वृद्धिर्लुकि हलि लुग्विकरणे उतो वृद्धिः पिति हलादौ सार्वधातुके नत्वभ्यस्तस्य ५९

यौति युतः युवंति युयाव युयुवतुः युयुविथ युयुविव युयुविम यविता यविष्यति यौतु युता
त् अयौत् अयुतां अयुवन् युयात् युयातां युयुः यूयात् यूयास्तां यूयासुः अयावीत् अयविष्टा
न् याप्रापणे याति यातः यांति ययौ ययतुः ययुः ययिथ ययाथ याता यास्यति यातु याता अयात्
त् अयात् अयातां २ लङः शाकटायनस्यैव अयुः अयान् वा स्यात् अयुः या
यात् यायातां यायुः यायात् यायास्तां यायासुः अयासीत् अयासिष्टां अयासिषुः अ
यासीत् अयासीष्टां अयासिषुः अयासीः अयासिष्टं अयासिष्ट अयासिषं अयासिष्व अया
सिष्म एवं वा गतिगंधनयोः भाती दीप्तौ स्ना शौचे श्रा पाके द्रा कुत्सायां गतौ प्सा भक्षणे पा र
क्षणे रा दाने ला आदाने ख्या प्रकथने अयं सार्वधातुकमात्रविषयः विद ज्ञाने विदो लटो वा वे
त्ति लटः परस्मैपदानां णलादयो वा वेद विदतुः विदुः वेत्थ विदथुः विद वेद विद्व विद्म प
क्षे वित्तः विदतः विदंति उषविदजागृभ्योऽन्यतरस्यां एभ्यो लिट्याम्वा विदेरदंतत्वप्रतिज्ञाना
दामि न गुणः विदांचकार विदांबभूव विदामास विवेद वेदिता वेदिष्यति विदांकुर्वंतु इ
त्यन्यतरस्यां वेत्तु विदांकुरुतात् गुणाभावो लोटो लुक् लोटः तकारोऽपि प्रयोगस्य वा निपात्यते अ

ल॰ कौ॰ ३

रुषवचनेनविवदिति ततोदिकस्य उः पापोपवादः विदांकरोतु अत उत्सार्वधातुके उप्रत्य
यान्तस्य कृञोऽकारस्य उत्स्यात् सार्वधातुके क्ङिति विदांकुरुतां उतश्च हेर्लुक् विदांकुरु विदां
करवाणि विदांकरवाव विदांकरवाम पक्षे वेत्तु वित्तात् वित्तां विदंतु विद्धि वित्तं वित्त वे
दानि वेदाव वेदाम अवेत् अवित्तां सिजभ्यस्तविदिभ्यश्च उसु अविदुः दश्च धातोर्दस्य पदां
तस्य सिपिरुर्वा अवेः विद्यात् विद्यास्तां अवेदीत् अवेदिष्यत् अस भुवि अस्ति श्नसोरल्लोपः
श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति स्तः संति तासस्त्योर्लोपः असि
स्थः स्थ अस्मि स्वः स्मः आर्धधातुके इत्यधिकृत्य अस्तेर्भूः बभूव भविता अस्तु स्तात् संतु
घ्वसोरेद्धावभ्यासलोपश्च घोरस्तेश्च एत्वं स्याद्धौ परे अभ्यासलोपश्च आभीयत्वात् हेर्धि ए
धि स्तात् स्तं स्त असानि असाव असाम आसीत् आस्तां आसन् स्यात् उपसर्गप्रादुर्भ्या
मस्तिर्यच्परः उपसर्गेण प्रादुसश्च अस्तेः सस्य षः स्यात् यकारेऽचि च परे निष्यात् प्रादुःष्यात्
भूयात् अभूत् इण् गतौ एति इतः । इणो यण् अजादौ प्रत्यये परे यंति अभ्यासस्यासवर्णे
इवर्णोवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि इयाय दीर्घ इणः किति इणोऽभ्यासस्य दीर्घः स्यात् किति ३

तिलिटि ईयतुः ईयुः इययिथ इयेथ येत येतां आयन् ईयात् ईयात् ॥ एतेर्लिङि उपसर्गा
त्परस्य इणो ह्रस्वः स्यात् आर्धधातुके किति लिङि. निरियात् इणो गा लिङि गातिस्थेति लु
क् अगात् अगातां अगुः मृजमृष्टौ मृजेर्वृद्धिः मृजेरिको वृद्धिः धातुप्रत्यये परे ङ्क्ति अ
जादौ वेष्यते अचेति षः मार्ष्टि मार्जंति ममार्ज ममार्जतुः ममृजतुः ममार्जिथ ममार्ष्ठ।
मार्जिता मार्ष्टा मार्जिष्यति मार्ष्टु अमार्ट् अमार्जीत् अमार्क्षीत् रुदिर् अश्रुविमोचने ॥ रु
दादिभ्यः सार्वधातुके रुदस्वप् श्वस् अन जक्ष पंच्यो वलादेः सार्वधातुकस्येट् स्यात्।
अट् गार्ग्यगालवयोः ॥ अरोदीत् अरोदत् अरुदित् अरुदतां अरुदन् अरोदीः अरोदः
रुद्यात् इरितो वा इरितो धातोः च्लेरङ् वा परस्मैपदेषु अरुदत् अरोदीत् ॥ जागृ निद्रा
क्षये जागर्ति जागृतः अदभ्यस्तात् वास्मात्स्यात् शेलोपवादः जाग्रति जागरांचकार
जजागार मार्ग्रा विचिण्णल्ङित्सु जागर्तेर्गुणः स्यात् विचिण्णल् ङित्स्वस्मिन्नेव विषये
प्रतिषेधविषयेवा जजागरतुः अजागः अजागः अजागृतां जुसिच अजागरुः सीजांतां
गस्य गुणः स्यात् अजागरुः अपिपिषि अजागर्यात् अजागरीत् दरिद्रा दुर्गतौ ॥ दरिद्राति

ल॰ कौ॰ ३१

इद्दरिद्रस्य दरिद्रातेरिकारः स्यात् हलादौ क्ङिति सार्वधातुके दरिद्रितः श्नाभ्यस्तयोरातः श्न-
नयोरातो लोपः स्यात् क्ङिति सार्वधातुके दरिद्रति अनेकाच्त्वात् आम् दरिद्रांचकार आतौ
णलियौत्वं ददरिद्रौ दरिद्राति दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः लुङि वा सनि
ण्वुल्ल्युटि न च दरिद्रिता अदरिद्रात् अदरिद्रिता अदरिद्रात् अदरिद्रितां अदरिद्रुः दरिद्रिया-
त् दरिद्र्यात् अदरिद्रीत् इट्सकौ अदरिद्रासीत् शास अनुशिष्टौ शास्ति शास इदङ्हलोः २
शास उपधाया इत् स्यात् अङि हलादौ क्ङिति च शासिवसिघसीनां च षः शिष्टः शासति शशास शा-
स्तु शाधि शासतु शा हौ शास्तेः शा आदेशः स्यात् हौ परे आभीयत्वेनासिद्धत्वात् हेर्धिः शाधि ^ अशात् शिष्यात् ^तिप्यनस्तेः पदांतस्य सस्य दः स्यात् तिपि न तु सेः^
सर्तिशास्त्यर्तिभ्यश्च एभ्यः च्लेरङ् स्यात् कर्तरि लुङि अशिषत् इति परस्मैपदिनः ॥ शीङ्
स्वप्ने शीङः सार्वधातुके गुणः २ क्ङिति चेत्यस्यापवादः शेते शयाते शीङो रुट् शीङः परस्य
झादेशस्यातो रुडागमः स्यात् शेरते शेषे शयाथे शेध्वे शये शेवहे शेमहे शिश्ये शिश्याते शि-
श्यिरे शयिता शयिष्यते शेतां शयातां शयीरन् शयीत शयिषीष्ट शयिषीयास्तां अशयिष्ट अश-
यिष्यत् इङ् अध्ययने इङिकावध्युपसर्गतो न व्यभिचरतः अधीते अधीयाते अधीयते गाङ्

३१

गाङ्लिटि इत्यनेन गाङ् लिटि अधिजगे अध्येता अध्येष्यते अध्ययै अध्ययावहै अध्ययामहै अध्यैत अ
ध्येयातां अध्येयत अध्यैथाः अध्यैयाथां अध्यैध्वं अध्यैय अध्यैवहि अध्यैमहि अधीयीत अधीयीया
तां अधीयीरन् अधीयीय विभाषा लुङ्लृङोः इत्यनेन गाङ् गाङ्कुटादिभ्योऽञ्णिन्ङित् गाङादेशात्कुटा
दिभ्यश्च ञित् णित् भिन्नप्रत्ययः ङितः स्युः घुमास्थागापाजहातिसां हलि एषामात ईत्स्यात् हलादौ
क्ङिति आर्धधातुके अध्यगीष्ट अध्यैष्ट अध्यगीष्यत अध्यैष्यत इत्यात्मनेपदिनः दुह प्रपूरणे दोग्धि
दुग्धः दुहंति धोक्षि दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे दुहे दुह्वहे दुह्महे दुदोह दुदुहे दोग्धा धो
क्ष्यति धोक्ष्यते दोग्धु दोग्धात् दुग्धात् दुग्धां दुहंतु दुग्धि दुग्धात् दुग्धं दुग्ध दोहानि दुग्धां दुहा
तां धुक्ष्व दुहाथां धुग्ध्वं दोहै दोहावहै दोहामहै अधोक् अधोग् अदुग्धां अदुग्धन् अदुग्ध अदुहा
तां अदुहत दुह्यात् दुहीत ॥ लिङ्सिचावात्मनेपदेषु ॥ इकः समीपाद्धलः परौ झलादी लिङ्सि
चौ किंतौ स्तः लिङि दुह्यात् दुह्यास्तां दुह्यासुः धुक्षीष्ट शल इगुपधादनिटः क्सः इगुपधो यः शलंतस्त
स्मादनिटः च्लेः क्सः अधुक्षत् लुग्वा दुहदिहलिहगुहामात्मनेपदे दंत्ये २ एषां क्सस्य लुग्वा दंत्ये तङि.
अदुग्ध अधुक्षत क्सस्याचि अजादौ तङि क्सस्य लोपः अधुक्षातां अधुक्षत अधुक्षथाः अदुग्धाः अधु

ल॰ कौ॰ ३२

क्षाथां अधुग्ध्वं अधुक्षि अधुक्षावहि अधुक्षामहि अधोक्ष्यत् अधोक्ष्यत २ लिह आस्वादने
लेढि लीढः लिहंति लेक्षि लेह्मि लिह्वः लिह्मः लीढे लिहाते लिक्षे लिहाथे लीढ्वे लिलेह लिलिहे
लेढा लेक्ष्यति लेक्ष्यते लेढु लीढात् लीढां लिहंतु लीढि लिहानि लेहाव लेहाम लीढां लिहातां
लिहतां अलेट् अलीढां अलिहन् लिह्यात् लिहीत लिहीयातां लिहीरन् लिह्यात् लिक्षीष्ट अलि
क्षत् अलिक्षातां अलीढ अलिक्षत् अलिक्षातां अलीढ अलिक्षत अलिक्षातां अलिक्षत अलेक्ष्यत् अले
क्ष्यत २ ब्रूञ् व्यक्तायां वाचि ब्रुवः पंचानामादित आहो ब्रुवः ब्रुवो लटः तिबादीनां णलादयः पंच वा स्युर्ब्रु
वश्चाहादेशः आह आहतुः आहुः आहस्थः झलि आत्थ आहथुः ब्रुव ईट् ब्रुवो हलादौ पिति ईट् ब्र
वीति ब्रूतः ब्रुवंति ब्रूते ब्रुवाते ब्रुवते ब्रुवो वचिः आर्धधातुके परे उवाच ऊचतुः ऊचुः उवचिथ
उवक्थ ऊचे वक्ता वक्ष्यति वक्ष्यते ब्रवीतु ब्रूतात् ब्रूतां ब्रुवंतु ब्रुवाणि ब्रूतां ब्रुवै अब्रवीत् अब्रूत ब्रू
यात् उच्यात् वक्षीष्ट २ अस्यतिवक्तिख्यातिभ्योऽङ् एभ्यः च्लेरङ् वच उम् अङि अवोचत् अवोचत
अवक्ष्यत् ऊर्णुञ् आच्छादने ऊर्णोतेर्विभाषा वृद्धिर्वा हलादौ पिति सार्वधातुके ऊर्णोति ऊर्णौति
ऊर्णुतः ऊर्णुवंति ऊर्णुते ऊर्णुवाते ऊर्णुवते ऊर्णोतेराम्नेति वाच्यं नंद्राः संयोगादयः अचपाःसं ३२

योगादयो नद्रा द्विर्न भवंति नशब्दस्य द्वित्वं ऊर्णुनाव ऊर्णुनुवतुः ऊर्णुनुवुः विभाषोर्णोः इ
डादिप्रत्ययो ङित्स्याद्वा ऊर्णुनुविथ ऊर्णुनविथ ऊर्णुविता ऊर्णविता ऊर्णोतु ऊर्णवाणि ऊ
र्णवै गुणोऽपृक्ते ऊर्णोत् गुणोऽपृक्ते हलादौ पिति सार्वधातुके और्णोत् ऊर्णुयात् ऊर्णूयात् ऊ
र्णविषीष्ट ऊर्णविषीयास्तां ऊर्णविषीरन् ऊर्णुविषीष्ट ऊर्णोतेर्विभाषा इडादौ सिचि परस्मै
पदे वृद्धिर्वा परे गुणः और्णावीत् और्णविष्टां और्णवीत् और्णुविष्टां और्णविष्ट और्णविषा
तां और्णविषत और्णविषतः और्णविष्ठाः और्णविषाथां और्णविढ्वं और्णविषि और्णविष्वहि औ
र्णविष्महि और्णविष्यत् और्णविष्यत और्णविष्यत इत्यदादिः हु दानादनयोः जुहोत्या
दिभ्यः श्लुः श्लौ धातोर्द्वे स्तः जुहोति जुहुतः अदभ्यस्तात् वास्यहुश्नुवोरिति यणि जुह्व
ति भीह्रीभृहुवां श्लुवच्च एभ्यो लिट्याम्वा स्यात् आमि श्लाविव कार्यं स्यात् जुहवांचकार जु
हाव जुहुवतुः जुहविथ होता होष्यति जुहोतु जुहुतात् जुहुतां जुहुधि जुहवानि ।
अजुहोत् अजुहुतां जुसि च इगन्तस्यांगस्य गुणः जुसि अजुहवुः उभे अभ्यस्तं षा
ष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः सिजभ्यस्तविदिभ्यश्चेति झेर्जुस्

स्यात् ह्रुयात् ह्रूयात् अहौषीत् भी भये बिभेति भियोन्यतरस्यां इकारः स्याद्धलादौ क्ङिति सार्व
धातुके बिभितः बिभीतः बिभ्यति बिभयांचकार बिभाय भेता भेष्यति बिभेतु बिभितात् अबिभेत्
बिभियात् भीयात् अभैषीत् अभेष्यत् ह्री लज्जायां जिह्रेति जिह्रीतः जिह्रियति जिह्रयांचकार
जिह्राय ह्रेता ह्रेष्यति जिह्रेतु अजिह्रेत् जिह्रीयात् ह्रीयात् अह्रैषीत् अह्रेष्यत् ॥ पॄ पालनपू
रणयोः अर्तिपिपर्त्योश्च अभ्यासस्य इः स्यात् श्लौ पिपर्ति उदोष्ठ्यपूर्वस्य अंगावयवौष्ठ्यपूर्वो य ॠत् ।
तदन्तस्यांगस्य उत् हलि च रेफवान्तयोरुपधाया इको दीर्घो हलि पिपूर्तः पिपुरति पपार शॄदॄ
प्रां ह्रस्वो वा किति लिटि पप्रतुः पपुः २ ऋच्छत्यॄतां लोदादिकस्य ऋच्छेः ऋतः ऋदन्तानां च गुणो
लिटि पपरतुः ऋतोवा वृङ्वृञ्भ्यां ऋदन्तेभ्यश्चेटो दीर्घो वा न तु लिटि परिता परीता परिष्यति प
रीष्यति पिपर्तु अपिपः अपिपूर्तां अपिपरुः पिपूर्यात् पूर्यात् अपारीत् ॥ सिचि परस्मैपदे
षु अवृद्धतः इटो न दीर्घः अपारिष्टां अपरिष्यत् अपरीष्यत् ॥ ओहाक् त्यागे जहाति जहातेश्च इश्चा
स्याद्धलादौ क्ङिति सार्वधातुके जहितः ई हल्यघोः श्नाभ्यस्तयोरातः ईत् स्यात् सार्वधातुके क्ङिति
हलि जहीतः श्नाभ्यस्तयोरातः लोपः क्ङिति सार्वधातुके जहति जहौ हाता हास्यति जहातु । ३२

जहितात् जहीतात् जहितां जहीतां आवहै जहातेश्चाद्विरीतौ जहाहि जहिहि जहीहि अजहा
त् अजहालोपोऽपि जहातेराकोलोपोयादौसार्वधातुके जह्यात् एलिङि इत्यनेनाकारस्यएत्वंस्यात्
हेयात् अहासीत् अहास्यत् ॥ माङ् माने शब्दे च भृञामित् भृञ्माङ् ओहाङ् एषामभ्यासस्येत्स्या
त् ईश्नो मिमीते मिमाते मिमते ममे माता मास्यते मिमीतां अमिमीत मिमीत मासीष्ट अमास्त
अमास्यत ॥ ओहाङ् गतौ जिहीते जिहाते जहे हाता हास्यते जिहीतां अजिहीत डुभृञ् धारण
पोषणयोः बिभर्ति बिभृतः बिभ्रति बिभृते बिभरांचकार बभार बभर्थ बभृव बिभरांचक्रे बिभ्रे भ
र्ता भरिष्यति बिभर्तु बिभराणि बिभृतां अबिभः अबिभृतां अबिभः अबिभृत बिभृयात् बिभ्रीत
भ्रियात् भृषीष्ट अभार्षीत् अभृत अभरिष्यत् ॥ डुदाञ् दाने ददाति दत्ते ददौ दाता दास्यति दत्ता
तु घ्वसोरित्येत्वं देहि दत्तं अददात् अदत्तां दद्यात् ददीत देयात् दासीष्ट अदात् अदत्तां अदुः
स्थाघ्वोरिच्च अनयोरिकारादेशः सिच्चि आत्मनेपदेषु अदित अदास्यत् अदास्यत ॥ डुधाञ् धारण
पोषणयोः दधाति दधस्तकारस्य धातोरवयवस्य भष् तथोः परयोः धत्तः दधति दधासि धत्थः दधामि
धत्ते दधाते धत्तु धेहि णिजिर् शौचपोषणयोः णिजां त्रयाणां गुणः श्लौ निजविजगुणः श्लौ ॥

ल॰ कौ॰ ३५

नेनेक्ति नेनिक्तः नेनिजति निनेनिज निनेनेज निनिजुः नेक्ता नेक्ष्यति नेनिक्ते नेनेक्तु नेनिग्धि ॥ ना
भ्यस्ताचि पिति सार्वधातुके लघूपधगुणो न नेनिजानि नेनिक्तां अनेनेक् अनेनिक्तां अनेनिजुः अ
नेनिजं अनेनिक्त नेनिज्यात् नेनिजेत् निज्यात् निक्षीष्ट इरितो वेत्यङ् अनिजत् अनैक्षीत् अनिक्त अ
नेक्ष्यत् इति निजादयस्त्रयः २ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु
दिवादिभ्यः श्यन् शपोऽपवादः हलि चेति दीर्घः दीव्यति दिदेव देविता देविष्यति दीव्यतु अदीव्यत्
दीव्येत् अदेवीत् अदेविष्यत् एवं षिवु तन्तुसन्ताने नृती गात्रविक्षेपे नृत्यति ननर्त नर्तिता सेऽसि
चि कृतचृतछृदतृदनृतः एभ्यः सिचि भिन्नस्य सादेरार्धधातुकस्येड्वा नर्तिष्यति नर्त्स्यति नृत्यतु अनृत्य
त् नृत्येत् नृत्यात् अनर्तीत् अनर्तिष्यत् त्रसी उद्वेगे वा भ्राशेति श्यन् त्रस्यति तत्रास वा जॄभ्रमुत्रसां
एषां किति लिटि सेटि थलि च एत्वाभ्यासलोपौ वा त्रेसतुः तत्रसतुः त्रेसिथ तत्रसिथ त्रसि
ता शो तनूकरणे ओतः श्यनि लोपः श्यति श्यतः श्यन्ति आदेच उपदेशेऽशिति शशौ शशतुः
शशुः शाता शास्यति विभाषा घ्राधेट्शाच्छासः एभ्यः सिचो लुग्वा परस्मैपदेषु अशात् अशातां
अशुः इट्सकौ अशासीत् अशासिष्टां छो छेदने छ्यति षो अन्तकर्मणि स्यति ससौ दो अवखण्डने

याति ददौ देयात् अदात् २ व्यध ताडने ग्रहिज्येति संप्रसारणं विध्यति विव्याध विविधतुः
विविधुः विव्यधिथ व्यद्धा व्यत्स्यति विध्यतु अविध्यत् विध्येत् विध्यात् अव्यात्सीत् अव्य
त्स्यत् शुष शोषणे शुष्यति शुशोष शोष्टा शोक्ष्यति २ पुषादीत्यङ् अशुष्यत् शुष्येत्।
शुष्यात् अशुषत् अशोक्ष्यत् ॥ णश अदर्शने नश्यति ननाश नेशतुः रधादिभ्यश्च वलादेरा
र्धधातुकस्येड्वा नेशिथ मस्जिनशोर्झलि नं ननंष्ठ नेशिव नेशिम नेश्म नशिता नंष्टा न
शिष्यति नंक्ष्यति नश्येत् नश्यात् अनशत् ॥ षूङ् प्राणिप्रसवे सूयते सुषुवे सुषुवाते सुषुवि
षे सोता सविता दूङ् परितापे दूयते दीङ् क्षये दीयते दीङो युडचि क्ङिति दीङः परस्याजादेः क्ङि
तआर्धधातुकस्य युट् वुग्युटौ उवङ्यणोः सिद्धौ वक्तव्यौ दिदीये मीनातिमिनोतिदीङां ल्यपि
च एषामात्वं स्याल्ल्यपि चात् अशित्येज्निमित्ते दाता दास्यते जनी प्रादुर्भावे ज्ञाजनोर्जा अनयोर्जा
देशः स्यात् शिति जायते जज्ञे जनिता जनिष्यति दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्यां
एभ्यः च्लेश्चिण् वा एकवचने तशब्दे परे चिणो लुक् चिणः परस्य लुक् जनिवध्योश्च अनयोर्वृद्धि
र्नेति चिणि ञिति च अजनि अजनिष्ट दीपी दीप्तौ दीप्यते दिदीपे अदीपि अदीपिष्ट पद गतौ प

ल. कौ. ३५ यते पेदे पत्ता पत्स्यते चिण्ते पदः पत्सीष्ट अपादि अपत्सातां अपत्सत विद सत्तायां विद्यते
वेत्ता २ बुध अवगमने बुध्यते बोद्धा भोत्स्यते भोत्सीष्ट अबोधि अबुद्ध अभुत्सातां युध संप्रहारे ॥
युध्यते योद्धा अयुद्ध २ सृज विसर्गे सृज्यते ससृज्यते ससृजे ससृजिषे सृजिदृशोर्झल्यमकि
ति स्रष्टयोरं जलादावकिति स्रष्टा स्रक्ष्यते सृक्षीष्ट असृष्ट असृक्षातां मृष तितिक्षायां मृष्य
ति मृष्यते ममर्ष ममर्षिथ ममृषे ममृषिषे मर्षितासि मर्षितासे मर्षिष्यति मर्षिष्यते ॥
णह बंधने नह्यति ननाह ननद्ध नेहिथ नद्धा नत्स्यति अनात्सीत् अनद्ध इति दिवादयः ॥ ॥
षुञ् अभिषवे स्वादिभ्यः श्नुः शपोपवादः सुनोति सुनुतः हुश्नुवोः सार्वधातुके इति यण् सुन्वंति सुनुवः सु
नुमः सुनुते सुन्वाते सुन्वते सुन्वहे सुनुमहे सुषाव सुषुवे सोतासि सोतासे सुनवानि सुनवै सुनुया
त् सूयात् स्तुसुधूञ्भ्यः परस्मैपदेषु सिच इट् असावीत् असोष्ट चिञ् चयने चिनोति चिनुते वि
भाषा चेः अभ्यासाच्चेः कुत्वं वा सनि लिटि च चिकाय चिचाय चिक्ये चिच्ये अचैषीत् अचेष्ट ।
स्तृञ् आच्छादने स्तृणोति स्तृणुते शर्पूर्वाः खयः अभ्यासस्य शर्पूर्वाः खयः शिष्यंते अन्ये हलो लु
प्यंते तस्तार तस्तरतुः तस्तरे गुणोर्तिसंयोगाद्योः स्तर्यात् ऋतश्च संयोगादेः ऋद्धंतात्संयोगा ३५

दे लिङ्सिचोरिट् वा नादिः स्तरिषीष्ट स्तृषीष्ट अस्तरिष्ट अस्तृत धुञ् कम्पने धुनोति धुनुते दुधाव
दुधुवे अधौषीत् अधोष्ट धूञ् कम्पने धूनोति धूनुते स्वरतीति वेट् दुधविथ दुधोथ । किति
लिटि श्र्युकः किति इति प्रतिषेधे प्राप्ते क्रादिनियमान्नित्यमिट् दुधुविव दुधविथ अ
धावीत् अधविष्ट अधोष्ट इति स्वादिः तुद व्यथने तुदादिभ्यः शः शपोऽपवादः तुदति तुदते
तुतोद तुतोदिथ तुतुदे तोत्ता अतौत्सीत् अतुत्त णुद प्रेरणे नुदति नुदते नुनोद नुनुदे नोत्ता
भ्रस्ज पाके ग्रहिज्यादिना संप्रसारणम् सस्य श्चुत्वेन शः शस्य जश्त्वेन जः भृज्जति भृज्जते भ्रस्जो रोपधयोरमन्यतर
स्यां भ्रस्जेरेफस्योपधायाश्च स्थाने रमागमो वा स्यात् धातोर्मित्त्वादन्त्यादचः परोऽयं स्थाने निर्देशा
द्रोपधयोर्निवृत्तिः बभर्ज बभर्जतुः बभर्जिथ बभ्रज्ज बभ्रज्जतुः बभ्रज्जिथ स्कोः संयोगाद्योरिति सलोपः व्रश्चे
ति षः बभ्रष्ठ बभर्ष्ठ बभ्रज्जे भर्ष्टा भ्रष्टा भर्क्ष्यति क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रति
षेधेन भृज्ज्यात् भृज्ज्यास्तां भृज्ज्यासुः अभार्क्षीत् अभ्राक्षीत् अभर्ष्ट अभ्रष्ट कृष विलेख
ने कृषति कृषते चकर्ष चकृषे अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् उपदेशेऽनुदात्तो य ऋ
दुपधस्तस्याम्वा झलादावकिति क्रष्टा कर्ष्टा क्रक्ष्यति कर्क्ष्यति स्पृशमृशकृषतृपदृपां च्लेः सिज्वा

36

ल॰ कौ॰ ६९

वव्रश्चुः अव्रश्चीत् अव्राक्षीत् अव्रक्ष्यत् अव्रक्षत् अव्रक्षतां अव्रक्षन् २ मुच्लृमोक्षणे मुचा
दीनां नुम् मुंचति मुंचते मोक्ता मुच्यात् मुक्षीष्ट अमुचत् अमुक्त अमुक्षातां लुप्लृ छेदने लुम्पति
लुम्पते लोप्ता अलुपत् अलुप्त विद्लृ लाभे विंदति विंदते विवेद विविदे व्याघ्रभूतिमतेनसेट् वेदिता भाष्यम
तेनेट् परिवेत्ता षिच क्षरणे सिंचति सिंचते लिपिसिचिह्वश्च [illegible] असिचत् आत्मनेपदेष्वन्य
तरस्यां लिपिसिचिह्वः [illegible] असिचत असिक्त कृ विक्षेपे ऋत इद्धातोः किरति चकार
चकरतुः चकरुः करिता करीता कीर्यात् अकारीत् गॄ निगरणे अचि विभाषा गिरते रेफस्य लो वा जातेः गिरति
गिलति जगार जगाल जगरिथ जगलिथ गरिता गरीता गलिता गलीता प्रच्छ ज्ञीप्सायां पृच्छति।
पप्रच्छ पप्रच्छतुः पप्रच्छुः प्रष्टा प्रक्ष्यति अप्राक्षीत् मृङ् प्राणत्यागे म्रियतेर्लुङ्लिङोः शितश्च [illegible]
[illegible] रिङ् शयग्लिङ्क्षु म्रियते ममार ममर्थ मम्रिव मर्ता मरिष्यति मृषीष्ट अमृ
त ॥ इति तुदादयः ॥ रुधिर् आवरणे रुधादिभ्यः श्नम् शपोपवादः रुणद्धि श्नसोरल्लोपः रुंधः रु
धन्ति रुणत्सि रुंद्धः रुंद्ध रुणध्मि रुंध्वः रुंध्मः रुंधे रुंधाते रुंधते रुंत्से रुंधाथे रुंधे रु
ध्वहे रुंध्महे रुरोध रुरुधे रोद्धा रोत्स्यति रुणद्धु रुंधात् रुंधां रुंधन्तु रुंधि रुणधानि रुणधाव ३९

रुन्धां रुन्धातां रुन्त्स्व रुणधै रुणधावहै रुणधामहै अरुणत् अरुन्द्धां अरुन्धन् अरुणत् अरुन्धं अरुन्-
द्ध अरुणधं अरुन्ध्व अरुन्ध्म अरुन्धत रुन्ध्यात् रुन्धीत रुध्यात् रुत्सीष्ट अरुधात् अरौत्सीत् अरो-
त्स्यत् एवं भिदिर् विदारणे छिदिर् द्वैधीकरणे युजिर् योगे शिष्लृ विशेषणे शिनष्टि शिंष्टः शिं-
षन्ति शिनक्षि शिशेष शिशेषिथ शेष्टा शेक्ष्यति हेर्धिः शिण्ढि शिनषाणि अशिनट् शिंष्या-
त् अशिषत् अशेक्ष्यत् ॥ एवं पिष्लृ संचूर्णने भञ्जो आमर्दने श्नान्नलोपः भनक्ति बभञ्जिथ बभं-
क्थ भुज पालनाभ्यवहारयोः भुनक्ति भोक्ता भोक्ष्यति अभुनक् ञिइन्धी दीप्तौ इन्धे इन्धाते इन्धते
इन्त्से इन्धाञ्चक्रे इन्धिता इन्धां इन्धातां इन्धतां इनधै ऐन्ध ऐन्धातां ऐन्धत विद विचारणे विन्ते वेत्ता
इति रुधादिः तनु विस्तारे तनादिकृञ्भ्य उः शपोपवादः तनोति तनुते ततान तेने तनिता तनिष्य-
ति तनोतु तनुतां अतनोत् अतनुत तनुयात् तन्वीत तन्यात् तनिषीष्ट अतनीत् अतानीत्।
तनादिभ्यस्तथासोः तनादेः सिचो वा लुक् तथासोः अतत अतनिष्ट अतथाः अतनिष्ठाः अतनिष्यत्
अतनिष्यत षणु दाने सनोति सनुते ये विभाषा यादौ प्रत्यये परे आत्वं वा स्यात् सायात् सन्यात्
जनसनखनां सञ्झलोः एषामाकारो झलादौ क्ङिति च असात असनिष्ट असाथाः असनिष्ठाः

वणहिंसायां क्षणोति क्षणुते ह्म्यंतेति न वृद्धिः अक्षणीत् अक्षत अक्षणिष्ट अक्षथाः अक्षणिष्ठाः
क्षिणुच उप्रत्यये लघूपधगुणो वा क्षेणोति क्षिणोति अक्षेणिष्ट तृणु अदने तृणोति तर्णोति तृणु
ते तर्णुते डुकृञ्करणे करोति अत उत्सार्वधातुके कुरुतः न भकुर्छुरां भस्य कुर्छुरोरुपधाया न
दीर्घः कुर्वंति नित्यं करोतेः करोतेः प्रत्यये उकारस्य नित्यं लोपो य्वोः कुर्वः कुर्मः कुरुते चकार च
कर्थ चकृव चकृम चक्रे कर्ता करिष्यति करोतु कुरुतात् अकरोत् अकुरुत ये च कृञ उत लोपो या
दौ प्रत्यये परे कुर्यात् कुर्वीत क्रियात् कृषीष्ट अकार्षीत् अकृत अकरिष्यत संपरिभ्यां करोतेः
भूषणे समवाये च सुट् संस्करोति अलंकरोतीत्यर्थः संस्कुर्वंति संघीभवंतीत्यर्थः संपूर्वस्य क्व
चिदभूषणेपि सुट् संस्कृतं भक्ष्यामि निहायकात् उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु कृञः सु
ट् स्यात् प्रागुक्तयोरर्थयोः प्रतियत्नो गुणाधानं विकृतमेव वैकृतं विकारः वाक्याध्याहार आकांक्षि
तैकदेशपूरणं उपस्कृता कन्या उपस्कृता ब्राह्मणाः एधोदकस्योपस्कुरुते उपस्कृतं भुंक्ते उप
स्कृतं ब्रूते वनु याचने वनुते ववने मनु अवबोधने मनुते मेने मनिता मनिष्यते मनुतां अ
मनुत मन्वीत मनिषीष्ट । इति तनादि डुक्रीञ् द्रव्यविनिमये क्र्यादिभ्यः श्ना शपोपवादः ॥ ३७

क्रीणाति ई हल्यघोः क्रीणीतः श्नाभ्यस्तयोरातः क्रीणन्ति क्रीणासि क्रीणीथः क्रीणीथ क्री
णामि क्रीणीवः क्रीणीमः क्रीणीते क्रीणीषे क्रीणाथे क्रीणीध्वे क्रीणे क्रीणीवहे क्रीणीमहे ॥
चिक्राय चिक्रियतुः चिक्रीषे चिक्रियिषे क्रेष्यति क्रीणातु क्रीणीतात् क्रीणीतां क्रीणंतां क्री
णीयात् क्रीणीत क्रीयात् क्रेषीष्ट अक्रैषीत् अक्रेष्ट अक्रेष्यत् अक्रेष्यत ॥ प्रीञ् तर्पणे कां
तौ च प्रीणाति प्रीणीते श्रीञ् पाके श्रीणाति श्रीणीते मीञ् हिंसायां प्रमीणाति प्रमीणी
ते मीनातीत्यात्वं ममौ मिम्यतुः ममिथ ममाथ मिम्ये माता मास्यति मीयात् मासी
ष्ट अमासीत् अमासिष्टां अमास्त षिञ् बंधने सिनाति सिनीते सिषाय सिष्ये सेता स्कु
ञ् आप्रवणे स्तन्भु स्तुन्भु स्कन्भु स्कुन्भु स्तम्भुः अप्रत्ययानन्ताच स्कुनोति स्कुनाति स्कुनीते
चुस्काव चुस्कुवे स्कोता अस्कौषीत् अस्कोष्ट स्तन्भ्वादयः चत्वारः सौत्राः सर्वे रोधनार्थाः ।
परस्मैपदिनः हलः श्नः शानज्झौ स्तभान जॄस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ।
च्लेरङ्वा अस्तभत् अस्तंभीत् युञ् बंधने युनाति युनीते योता क्नूञ् शब्दे क्नूनाति क्नूनीते
क्नविता द्रूञ् हिंसायां द्रूणाति द्रूणीते पूञ् पवने प्वादीनां ह्रस्वः पूञ् लूञ् स्तृञ् कॄञ्

लं: कौ: ३८

धूञ् धूञ् मृञ् दृञ् जॄ कॄ गॄ ऋ री ली व्ली प्लीनां च त्वविं प्वादीनां ह्रस्वः पुनाति पुनीते पविता।
लूञ् छेदने २ लुनाति लुनीते लविता स्तॄञ् आच्छादने स्तृणाति स्तृणीते तस्तार तस्तरतुः तस्तरे तस्तरिता
स्तरीता स्तृणीत स्तीर्यात् लिङ्सिचोरात्मनेपदेषु वृड्वृभ्यां ... लिङ्सिचोरिट्
वा नडि स्तरिषीष्ट स्तीर्षीष्ट २ सिचि च परस्मैपदेषु अस्तारीत् अस्तारिष्टां अस्तारिषुः अस्तरिष्ट
तस्यानिकित्वे अस्तीर्ष्ट कॄञ् हिंसायां कृणाति कृणीते चकार चकरे वृञ् वरणे वृणाति वृ
णीते ववार ववर वरिता वरीता ऊर्णोतेः वृणीत वरिषीष्ट वृषीष्ट अवारीत् अवारिष्टां अवारिषु
अवरिष्ट अवृष्ट धूञ् कम्पने धुनाति धुनीते दुधविथ दुधोथ दुधविथ धोता धविता स्वरति सूति
सूयतिधूञः परस्मैपदेषु अधावीत् अधविष्ट अधोष्ट ग्रह उपादाने गृह्णाति गृह्णीते जग्राह जगृहे।
ग्रहोऽलिटि दीर्घः एकाचो ग्रहो विहितस्येटः दीर्घो न तु लिटि ग्रहीता गृह्णातु गृहाण गृह्यात्।
ग्रहीषीष्ट ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् अग्रहीत् अग्रहीष्टां अग्रहीष्ट अग्रहीषातां कुष निष्कर्षे कुष्णाति
कोषिता निरः कुषः ... निष्कोषिता निष्कोष्टा निरकोषीत् निरकुक्षत्
त् अश भोजने अश्नाति आश अशिता अशिष्यति अश्नातु अशान ज्ञा अवबोधने जा ३८

नाति ज्ञेप्सा पृ पालनपूरणयोः पूरयति पूर्हिंसायां पूरयति पूपूरत् हिंसोवेति हिंसवर्धतेयए

शङ्कतः घाशरतः क्षुविदारणे दारयति ददरतः दद्रुतः ज्रृ वयोहानौ जारयति मुक्षणेषे मु

क्षयति मोक्षयिता मुमुक्षोः मुक्षयति पोक्षयिता बंध बंधने बन्धयति बबन्धिथ बबंध बद्धा बन्त्स्यति

क्षिप विबाधने क्षिपयति क्षेपयिता क्षेप्ता मक्षेपीत मक्षिरसन वृत् संभक्तौ वव्रे ववृष व

वृधे वर्तिता वर्तीता ववर्तिषीष्ट अवृतत इतिक्र्यादिः चुर स्तेये सप्तापपाशान्तूपवीणान्तसक्ष्णाक

सेनालोमत्वचावर्मवर्णचूर्णचुरादिभ्यो णिच् पश्चोणिच् स्वार्थेऽगुणेनेति गुणः सप्तायंतात्

निधात्वं तिप् शवादिगुणयादेशौ चोरयति णिचस्य णिजंतात्मनेपदं कर्तृगामिनि

क्रियाफले चोरयते चोरयामास चोरयिता चोरयान् चोरयिषीष्ट णिश्रीति चङ् णौ चङि

ति ह्रस्वः द्वित्वं हलादि शेषः दीर्घो लघोरित्यभ्यासस्य दीर्घः अचूचुरत् कथवाक्यप्रबंधे ।

अतो लोपः अचः परस्मिन्पूर्वविधौ परनिमित्तोऽजादेशः स्थानिवत् स्थानिभूतादचः पूर्वत्वे

न दृष्टस्य विधौ कर्तव्ये अजादेशस्य स्थानिवत्वात् उपधावृद्धिः कथयति अचीकथत्वा दीर्घमनत्वडोषेन अच

कथत् गणसंख्याने गणयति ईच गणः गणयतेरभ्यासस्येत्स्यात्सादन् णौचङ्परे अजीगणत्

अजगणत् इति चुरादि स्वतन्त्रः कर्ता क्रियायां स्यात्तेन प्रेरणे विवक्षिते धातोः णिच् स्यात् तत्प्रयोजको हेतु
श्च कर्तृः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च हेतुमति च प्रयोजकव्यापारे प्रेरणादौ वाच्ये धातोर्णिच्
भवन्तं प्रेरयति भावयति ओः पुयण्ज्यपरे सनि परे यदङ्गं तदवयवाभ्यासोतः इत्स्यात् पवर्गयणु ज
कारेष्ववर्णपरेषु परतः अबीभवत् ष्ठा गतिनिवृत्तौ अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुक्
णौ स्थापयति तिष्ठतेरित् उपधाया इत्स्यात्परे णौ अतिष्ठिपत् घटादयः षितः मितां ह्रस्वः घटादी
नां ज्ञपादीनां च ह्रस्वः घटयति ज्ञप ज्ञाने ज्ञापने च ज्ञपयति अजिज्ञपत् शाच्छासा
ह्वाव्यापां युक् णौ पाययति धातोः कर्मणः समानकर्तृकादिच्छायां वा इषिकर्मणो धातोरिषि
णैककर्तृकात्सन्निच्छायां पठ्यमानायां वाचि इट् सन्यङोः सन्नन्तस्य यङन्तस्य च प्रथमस्यैका
चो द्वे स्तोऽजादेस्तु द्वितीयस्य सन्यतः अभ्यासस्यात इत्वं पठितुमिच्छति पिपठिषति कर्मणः
किं गमनेनेच्छति समानकर्तृकात् किं शिष्याः पठन्त्वितीच्छति गुरुः वाग्रहणाद्वाक्यमपि ल
ङ् सनोर्घस्लृ सस्यार्धधातुके सस्य तः स्यात् सार्धधातुके अत्तुमिच्छति जिघत्सति एकाच इ
ति नेट् अज्झनगमां सनि अजन्तानां हन्तेरिजादेशगमेश्च दीर्घो झलादौ सनि इको झल् इगन्ता ३९

कालादिसन्नाकिन्न सन्नन्तहाताः कर्तुमिच्छति चिकीर्षति सनिग्रहगुहोश्च ग्रहेर्गुहेश्च कराणां तास्य स
नइएतस्मात् बुभूषति धातोरेकाचो हलादेः क्रियासमभिहारे यङ् धौतः पुनः पुनः भृशार्थे च यो ऽस्य धा
तोरेकाच हलादेर्यङ् गुणो यङ्लुकोः अभ्यासस्य गुणो यङ्लुकोः किंच परतः ङिदं तत्त्वादात्मने
पदं पुनः पुनरतिशयेन वा भवति बोभूयते बोभूयांचक्रे अबोभूयिष्ट नित्यं कौटिल्ये गतौ यङ्
नतु क्रियासमभिहारे दीर्घोकितः अकितो ऽभ्यासस्य दीर्घो यङ्यङ्लुकोः कुटिलं व्रजति वा
व्रज्यते यस्य हलः हलः परस्य यस्य लोप आर्धधातुके अतो ऽदेः परस्य अतो लोपः वाव्रजांचक्रे।
वाव्रजिता रीगृदुपधस्य च ऋदुपधस्य धातोरभ्यासस्य रीगागमो भवति यङ्यङ्लुकोः वरीवृत्य
ते वरीवृतांचक्रे वरीवृतिता वश्चादिभ्यश्च वश्चादिभ्यो धातुभ्यो नित्यं गणेषु त्वेन नरीनृत्यते जरीगृह्यते।
यङो ऽचि च यङः अचि परे लुक् कस्मात् चकारात् विनापि क्वचित् अनैमित्तिको ऽयमंतरंगत्वादा
दौ भवति ततः प्रत्ययलक्षणेन यङंतत्वात् द्वित्वमभ्यासस्य कार्यं धातुत्वात् लडादयः शे
षात्कर्तरि परस्मैपदं चर्करीतं च इत्यदादौ पाठाच्छपो लुक् यङो वा यङ्लुकः तास्तरस्य हलादेः पितः
सार्वधातुके ऽपृक्ते वा तस्मात् भूसुवोस्तिङि निषेधो यङ्लुकि मा भाषान्तं बोभूतीति निकानिकं दसिमि

लं॰
कौ॰
पं॰

पातनात् बोभवीति बोभोति बोभूतः बोभुवति बोभवीषि बोभोषि बोभूथ बोभवीमि बोभोमि बो
भूवः बोभूमः बोभवांचकार बोभवांबभूव बोभवामास बोभविता बोभविष्यति बोभवीतु बोभोतु बो
भूतात् बोभूतां बोभवतु बोभूहि बोभवानि अबोभवीत् अबोभोत् अबोभूतां अबोभुवुः बोभूयात् बो
भूयास्तां बोभूयासुः गातिस्थेति सिचो लुक् यङो वेतीट् पदे गुणः न त्वयाथित्वानित्यत्वाद्युक् अबोभू
वीत् अबोभूत् अबोभूतां अबो अबोभूवुः अबोभविष्यत् इति णिच्सनयङ्लुकन्ताः सुप आत्म
नः क्यच् इषिकर्मणः पुत्रादात्मनः संबन्धिनः सुबन्तादिच्छायामर्थे क्यच् स्यात् सुपो धातुप्राति
पदिकयोः एतयोरवयवस्य सुपो लुक् क्यचि च अवर्णस्य ई आत्मनः पुत्रमिच्छति पुत्रीयति ।
मान्तप्रकृतिकसुबन्तावयवात् क्यच् न किमिच्छति स्वरिच्छति नः क्ये क्यचि क्यङि नान्तमेव
पदं नान्यत् नलोपः राजीयति नान्तमेवेति किं वाच्यति हलि च गीर्यति पूर्यति धातोरि
त्येवनेह दिवमिच्छति दिव्यति क्यस्य विभाषा हलः परयोः क्यच् क्यङोर्लोपो वार्धधातुके
आदेः परस्य अतो लोपः तस्य स्थानिवत्वात् लघूपधगुणो न समिधिता समिध्यिता उक्तविषये का ।
म्यच् पुत्रमात्मनः इच्छति पुत्रकाम्यति उपमानादाचारे उपमानात् आचारेऽर्थे क्यच् पुत्रमिवाचरति । पं॰

पुत्रीयति अस्याचं विस्मृयतीति दिनं सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः कृष्णोऽमुगणे कृष्ण इवाचरति कृ
ष्णति स इवाचरति स्वति स्वस्ता अनुनासिकस्य क्विझलोः क्ङिति अनुनासिकान्तस्योपधाया दीर्घः
स्यात् क्विझलादौ क्ङिति इदमिवाचरति इदामति राजेवाचरति राजानति पन्था इवाचरति प
थीयति ॥ कष्टाय क्रमणे चतुर्थ्यन्तात् कष्टशब्दादुत्साहेऽर्थे क्यङ् कष्टाय क्रमते कष्टा
यते पापं कर्तुमुत्साहते इत्यर्थः शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे एभ्यः करोत्यर्थे क्यङ्
शब्दं करोति शब्दायते तत्करोति तदाचष्टे इति णिच् णाविष्ठवत्प्रातिपदिकस्य इष्ठे यथा प्रा
तिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपस्थ्याद्यादेशभसंज्ञास्तद्वण्णावपि
स्युरित्यल्लोपः घटं करोत्याचष्टे वा घटयति ॥ इति नामधातुप्रक्रिया ॥ कण्ड्वादिभ्यो यक्।
एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे कण्डूञ् गात्रविघर्षणे कण्डूयति कण्डूयते इत्यादि कर्तरि
कर्मव्यतिहारे क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं व्यतिलुनीते अन्यस्य योग्यं लवनं करोती
त्यर्थः न गतिहिंसार्थेभ्यः व्यतिगच्छन्ति व्यतिघ्नन्ति नेर्विशः निविशते परिव्यवेभ्यः क्रियः ॥
परिक्रीणीते विक्रीणीते अवक्रीणीते विपराभ्यां जेः विजयते पराजयते समवप्रविभ्यः स्थः।

श्री

ल॰ कौ॰ ४। संतिष्ठते अवतिष्ठते प्रतिष्ठते वितिष्ठते अपह्नवे ज्ञः शतमपजानीते सर्पिषोपायेन वर्तत इत्यर्थः उ
दश्चरः सकर्मकात् धर्ममुच्चरते उल्लंघ्य गच्छतीत्यर्थः समस्तृतीयायुक्तात् रथेन संचरते दा
णश्च सा चेच्चतुर्थ्यर्थे समो दाणस्तृतीयांतेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे दास्या संय
च्छते कामी पूर्ववत्सनः सनः पूर्वो यो धातुस्तेन तुल्यं सन्नंतादप्यात्मनेपदं स्यात् एदिधिषते
हलंताच्च इको झलः परो झलादिः सन् कित् निविविक्षते गंधनावक्षेपणसेवनसाहसि
क्यप्रतियत्नप्रकथनोपयोगेषु कृञः गंधनं हिंसा उत्कुरुते सूचयतीत्यर्थः अवक्षेपो भर्त्सनं श्येनो
वर्तिकामुदाकुरुते भर्त्सयतीत्यर्थः हरिमुपकुरुते सेवते परदारान्प्रकुरुते तेषु सहसा प्रवर्त
ते एधोदकस्योपस्कुरुते गुणमाधत्ते कथाः प्रकुरुते प्रकथयति शतं प्रकुरुते धर्मार्थं विनि
युंक्ते एषु किं कटं करोति भुजोऽनवने ओदनं भुंक्ते अनवने किं महीं भुनक्ति ॥ इत्यात्मनेप
दविधिः अनुपराभ्यां कृञः कर्तृगे च फले गंधनादौ च वाच्ये परस्मैपदं स्यात् अनुकरोति पराक
रोति अभिप्रत्यतिभ्यः क्षिपः क्षिप प्रेरणे स्वरितेत् अभिक्षिपति प्राद्वहः प्रवहति परेर्मृषः प
रिमृष्यति व्याङ्परिभ्यो रमः रमु क्रीडायां विरमति उपाच्च यज्ञदत्तमुपरमति उपरमयतीत्यर्थः ४।

म्रं नभाविनएवधौगं इतिपदव्यवस्था भावकर्मणोर्लस्यात्मनेपदं सार्वधातुकेयक् भावकर्मवा
चिनि धातोर्यक् सार्वधातुके भावः क्रियासा च भावार्थकलकारेणानूद्यते तत्र युष्मदस्मद्भ्यां स
मानाधिकरण्याभावात्प्रथमपुरुषः तिङ्वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्वि
वचनादि किं त्वेकवचनमेवोत्सर्गतः त्वया मया अन्यैश्च वा भूयते बभूवे स्यसिच्सीयुट्ता
सिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ उपदेशेयोच् उदंतानां हना
दीनां चिण्वदिङ्गा कार्यं वा स्यात् स्यादिषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च
चिण्वद्भावपक्षे यमिट् चिण्वद्भावाद्वृद्धिः भाविता भविता भाविष्यते भविष्यते भूयतां अभू
यत भूयेत भाविषीष्ट चिण् भावकर्मणोः च्लेश्चिण् भावकर्मवाचिनि तउपशब्दे परे चिणोलु
क् अभावि अभाविष्यत अभविष्यत अकर्मकोप्युपसर्गवशात्सकर्मकः अनुभूयते आ
नंदः चैत्रेण त्वया मया वा अनुभूयेते अनुभूयंते त्वमनुभूयसे अहमनुभूयसे अन्वभावि
अन्वभाविषातां णिलोपः भाव्यते भावयांचक्रे भावयांबभूवे भावयामासे भावयिता चिण्व
दिट् आभीयत्वेनासिद्धत्वाण्णिलोपः भाविता भाविष्यते भावयिष्यते भाव्यतां अभाव्यत ।

ल० कौ०

भाव्येत भाविषीष्ट अभावि अभाविषातां अभावयिषातां बुभूष्यते बुभूषांचक्रे बुभूषिता बुभू-
षिष्यते बुभूषीषीष्ट यते ष्टुञ् स्तुतौ अकृत्सार्वधातुकयोर्दीर्घः स्तूयते विष्णुः स्ताविता स्तोता स्तावि-
ष्यते स्तोष्यते अस्तावि अस्ताविषातां अस्तोषातां ऋ गतौ गुणोर्तीति गुणः अर्यते स्मृ स्मरणे
स्मर्यते सस्मरे उपदेशग्रहणाच्चिण्वदिट् आरिता आर्ता स्मारिता स्मर्ता नलोपः स्रस्यते इदि-
तस्तु नंद्यते संप्रसारणं इज्यते तनोतेर्यकि तनोतेरात्वं वा स्यात् यकि तायते तन्यते त-
पोऽनुतापे च तपतेश्चिण् न स्यात्कर्मकर्त्तर्यनुतापे अन्वतप्त पापेन घुमास्थेतीत्वं दीयते धी-
यते ददे आतो युक् चिण्कृतोः आदंतानां गुणागाम स्थिलिष्क्रिनिकृतीनिच दायिता दाता दायि-
षीष्ट दासीष्ट अदायि अदायिषातां भज्यते भंजेश्च चिणि नलोपो वा अभाजि अभंजि लभ्यते वि-
भाषा चिण्णमुलोः लभेर्नुम् अलंभि अलाभि यदा कर्मैव कर्तृत्वेन विवक्षितं तदा सकर्मका-
णामपि अकर्मकत्वात्कर्तरि भावे च लः कर्मवत्कर्मणा तुल्यक्रियः कर्मणा तुल्यक्रियः कर्ता क-
र्मवत्स्यात् कार्यातिदेशोऽयं तेन यगात्मनेपदं चिण् चिण्वदिट् स्युः पच्यते फलं भिद्यते काष्ठं स्व-
यमेव अभेदि वा भावे भिद्यते काष्ठेन इति भावकर्मप्रक्रिया अभिज्ञावचने लृट् ॥ स्मृतिबोधि ८२

सुप्युपपदे भूतानद्यतने धातोर्लृट् लङोऽपवादः वस निवासे स्मरसि कृष्ण गोकुले वत्स्यामः एवं बुध्यसे चे
तयसे वा न यदि यद्योगे उक्तं न अभिजानासि यद्वने अभुञ्ज्म लटः स्मे लिटोऽपवादः यजति स्म युधिष्ठिरः
वर्तमानसामीप्ये वर्तमानवद्वा वर्तमाने ये प्रत्ययास्ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः क
दागतोऽसि अयमागच्छामि अयमागमं वा कदा गमिष्यसि एष गच्छामि गमिष्यामि हेतुहेतु
मतोर्लिङ् वा स्यात् कृष्णं नमेच्चेत् सुखं यायात् कृष्णं नंस्यति चेत् सुखं यास्यति भविष्यत्येवेष्य
ते नेह हन्तीति पलायते विधिनिमन्त्रणेति लिङ् विधिर्भृत्यादेर्निकृष्टस्य प्रवर्तनं यजेत निमन्त्र
णं आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनं इह भुञ्जीत आमन्त्रणं कामचारानुज्ञा अधीष्टः
सत्कारपूर्वको व्यापारः पुत्रमध्यापयेत् सम्प्रश्नः भो वेदमधीयीय उत तर्कं प्रार्थनायां भोजनं।
लभेय एवं लोट् इति लकारार्थप्रक्रिया ॥ इति श्रीवरदराजभट्टविरचितायां लघुकौमुद्यां ति
ङन्तप्रक्रिया समाप्ता ॥ ॐ नमः सरस्वत्यै ॥ ॐ धातोः आतृतीयाध्यायान्ते ये प्रत्यया।
स्ते धातोः परे स्युः कृदतिङ् तिङ्भिन्नः कृत्संज्ञः वासरूपोऽस्त्रियां अस्मिन्धात्वधिकारे असरूपोऽपवादः प्र
त्यय उत्सर्गस्य बाधकः स्त्र्यधिकारोक्तं विना कृत्याः ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः । क

ल॰ कौ॰ ५२ कर्तरि कृत् इति प्राप्ते तयोरेव कृत्यक्तखलर्थाः एते भावकर्मणोरेव स्युः तव्यत्तव्यानीयरः धातोरेते
स्युः एधितव्यं एधनीयं त्वया भावे औत्सर्गिकमेकवचनं क्लीबत्वं च चेतव्यश्चयनीयो वा धर्मस्त्वया के
लिमर उपसंख्यानं पचेलिमा माषाः पक्तव्या इत्यर्थः भिदेलिमाः काष्ठाः कर्मणि प्रत्ययः कृत्यल्यु
टो बहुलं ॥ क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव विधेर्विधानं बहुधा समी
क्ष्य चतुर्विधं बाहुलकं वदन्ति स्नात्यनेन स्नानीयं चूर्णं दीयतेऽस्मै दानीयो विप्रः अचो यत् चेयं जे
यं ईद्यति आतः गुणः देयं ग्लेयं पोरदुपधात् पवर्गान्तादकारोपधाद्यत् ण्यतोऽपवादः शप्यं लभ्यं
एतिस्तुशास्वृदृजुषः क्यप् ह्रस्वस्य पिति कृति तुक् इत्यः स्तुत्यः शासु अनुशिष्टौ शास इद
ङ्हलोः शास उपधाया इत्स्यात् अङि हलादौ क्ङिति शिष्यः वृत्यः आदृत्यः जुष्यः जुषी प्री
तिसेवनयोः जुष्यः मृजेर्विभाषा मृजेः क्यब्वा मृज्यः ऋहलोर्ण्यत् ऋवर्णान्ताद्धलन्ताच्च
ण्यत् कार्यं धार्यं हार्यं चजोः कु घिण्ण्यतोः चजोः कुत्वं स्यात् घिति ण्यति च निष्ठायामनिट्
इति वक्तव्यं तेनेह न गर्ज्यं मृजेर्वृद्धिः मृजेरिको वृद्धिः सार्वधातुकार्धधातुकयोः ऋदितश्च मार्ग्यः
भोज्यं भक्ष्ये भोग्यमन्यत् इति कृत्यप्रक्रिया ण्वुल्तृचौ धातोरेतौ स्तः कर्तरि कृत् इति कर्त्रर्थे यवो ५२

ण्वाको युवनयोः अनेकाल्त्वात्सर्वः कारकः कर्ता नंदिग्रहिपचादिभ्यो ल्युणिन्यचः नंद्यादेर्ल्युः
ग्रहादेर्णिनिः पचादेरच् स्यात् नंदयतीति नंदनः जनार्दनः लवणः ग्राही स्थायी मंत्रिणप्रपरिभाव
णि मंत्री पचः आकृतिगणोयं इगुपधज्ञाप्रीकिरः कः क्षिपः बुधः कृशः ज्ञः प्रियः किरः आतश्चोप
सर्गे प्रज्ञः सुग्लः गाहकः गेहवतीति विशृंहकः शुक्तं कर्मण्यण कर्मण्युपपदे धातोरण् कुंभंक
रोतीति कुंभकारः आतोनुपसर्गे कः गोदः कंबलदः अनुपसर्गे किं गोसंदायः
मूलविभुजादिभ्यः कः मूलानि विभुजन्ति मूलविभुजो रथः आकृतिगणोयं महीध्रः कुध्रः
चरेष्टः अधिकरणे उपपदे कुरुचरः भिक्षासेनादायेषु च भिक्षाचरः सेनाचरः आदायेति ल्य
बंते आदायचरः हृञो हेतुताच्छील्यानुलोम्येषु वयस्यनुद्यमेषु कृञः अतः कृकमिकंस कुंभपात्र
कुशाकर्णीष्वनव्ययस्य अतउत्तरस्यानव्ययविसर्गस्य समासे नित्यं सादेशः वरोल्यादिष्वपरेषु य
शस्करी विद्या आकृवारः वचनकारः एजेः खश एजयतेर्ण्यंतादेजेः खश् स्यात् अरुर्द्विषदजंतस्य मुम् अ
व्ययोजिघ्नेजंतस्य च मुमागमः खित्यंते नत्वव्ययस्य शिलाघ्नस्यादि एजृकम्पने जनमेजयतीति
जनमेजयः प्रियवशो वदः खच् प्रियंवदः वशंवदः अन्येभ्योपि दृश्यंते मनिप् कनिप् वनिप् विच्

ल. कौ. ४४

यते प्रत्यया धातोः स्युः नेड्वशि कृति वशादेः कृत इण्न स्यात् स्मृ हिंसायां स्वरार्मा प्रात्तरित्वा विद्धरोर
न्तनासिकस्मात् अवन्तनासिकस्मात् विरिविनिव विजायते इति विजावा ओण् अपनयने अवावाम्
ध्वरिषु हिंसायां रोट् रेट् सुगण क्विप् च अन्यत्रापि दृश्यते उखास्रत् पर्णध्वत् वाहभ्रट् सुप्यजातौ णि
निस्ताच्छील्ये अजात्यर्थे सुपि धातोर्णिनिः स्यात् ताच्छील्ये द्योत्ये उष्णभोजी शीतभोजी मनः सुपि
मन्यतेर्णिनिः स्यात् दर्शनीयमानी आत्ममाने खश्च स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् चा
णिनिः पण्डितमात्मानं मन्यते इति पण्डितंमन्यः पण्डितमानी खित्यनव्ययस्य खिदन्ते नव्ययस्य
ह्रस्वः कालिंमन्यः अव्ययस्य तु दिवामन्या करणे यजः करणे उपपदे भूतार्थे यजेर्णिनिः कर्तरि सोमे
नेष्टवान् सोमयाजी दृशेः क्वनिप् कर्मणि भूते पारं दृष्टवान् पारदृश्वा राजनि युधि कृञः क्वनि
प् युधिरन्तर्भावितण्यर्थः राजानं योधितवान् राजयुध्वा राजकृत्वा सहे च सहयुध्वा सप्तम्यां
जनेर्डः तत्पुरुषे कृति बहुलमित्यलुक् सरसिजं सरोजं उपसर्गे च संज्ञायां प्रजा क्तक्तवतू निष्ठा एतौ निष्ठासं
ज्ञौ स्तः तत्र भूतार्थे धातोर्निष्ठा स्यात् तत्र तयोरेवेति भावकर्मणोः क्तः कर्तरि क्तवतुः स्नातं मया ।
स्तुतस्त्वया विष्णुः विश्वं कृतवान् रदाभ्यां निष्ठातो नः पूर्वस्य च दः रदाभ्यां निष्ठातस्य नो निष्ठापेक्षया ४४

पूर्वस्य धातोरीट् स्यात्ः स्तृ हिंसायां भिदिर् विदारणे छिदिर् द्वैधीकरणे स्तीर्णः भिन्नः छिन्नः संयोगा
देरातो धातोर्यण्वतः ऽ स्त्यन्तस्य योगादेरात् तान्निष्ठानस्य नः ग्लानः म्लानः ल्वादिभ्यः एकविंशते
र्ल्वादिभ्यः प्रागवत् लूनः ज्यावयोर्ह्रस्वो ग्रहिज्या इत्यः संगवयवादलपर्यन्तस्य प्रसारणं तदन्तस्या
गमस्य दीर्घः जीनः ओदितश्च प्रागवत् भुजो कौटिल्ये भुग्नः श्वीदितो निष्ठायां श्वीदितो निष्ठायां इण्न
टुओश्वि गतिवृद्ध्योः शूनः शुषः कः निष्ठान्तस्य शुष्कः पचो वः पक्वः क्षायो मः क्षामः यस्य वि
भाषा यस्य ऊदितो हि हितमतो निष्ठायामिड्वा गुप्तः निष्ठायां सेटि णेर्लोपः भावितः भावितवान्
दृढः स्थूलबलयोः स्थूले बलवति च दृढ इति निपात्यते दधातेर्हिः तादौ किति हितं दोदद्घो
घुसंज्ञस्य दास्तस्य दद् तादौ किति दत्तं दत्तं लिटः कानज्वा क्वसुश्च लिटः कानच् क्वसुः
तङानावात्मने पदं च ज्ञानः स्मोश्च मानस्य धातोर्नः सोः परतः जगन्वान् लटः शतृशानचा
वप्रथमासमानाधिकरणे लट् पचन्तौ वा लः शाधादि पचन्तं चैत्रं पश्य पचमानेन कृतं सन्तं गस्य
चमानं पश्य लटि स्यच्च वर्तमाने भूतवत् ग्रहणात्प्रथमासमानाधिकरणेऽपि क्वचित् सद्विजः
विदेः शतुर्वसुः वेत्तेः परस्य शतुर्वसुरादेशो वा विदन् विद्वान् यसा कृतद्धितानामेकाचामाद्यन्तं

ल॰ कौ॰ ४५

[illegible] नास्येषां विदन् विद्वान्। तौ सत्। तौ शतृशानचौ सत्संज्ञौ स्तः। लृटः सद्वा। करिष्यन्तं करि
ष्यमाणं पश्य। आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु। क्विपमभिव्याप्य वक्ष्यमाणास्तच्छीलादिषु कर्तृषु
बोध्याः। तृन्। कर्ता कटान्। जल्पभिक्षकुट्टलुण्टवृङः षाकन्। षः प्रत्ययस्य। प्रत्ययस्यादिः षः इत्। जल्पा
कः भिक्षाकः कुट्टाकः लुण्टाकः वराकः। सनाशंसभिक्ष उः। चिकीर्षुः आशंसुः भिक्षुः। भ्राज
भासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्। विभ्राट् भाः। राल्लोपः। रेफाच्छ्वोर्लोपः क्वौ
झलादौ क्ङिति। धूः विद्युत् ऊर्क् पूः। दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः। जूः ग्रावस्तुत्। क्विब्वचिप्रच्छ्या
यतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च। वक्तीति वाक्। पृच्छतीति प्राट्। आयतं स्तौतीति आयतस्तूः
कटं प्रवते कटप्रूः। जूरुक्तः। श्रयति हरिं श्रीः। दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।
दाबादेः ष्ट्रन् करणेऽर्थे। दान्त्यनेनेति दात्रं नेत्रं। तितुत्रतथसिसुसरकसेषु च। एषां दशानामिटो न। शस्त्रं
योत्रं योक्त्रं स्तोत्रं तोत्त्रं सेत्रं सेक्त्रं मेढ्रं पत्त्रं दंष्ट्रा नद्ध्री। अर्तिलूधूसूखनसहचर इत्रः। अरित्रं लवित्रं धवित्रं सवित्रं
खनित्रं सहित्रं चरित्रं। पुवः संज्ञायां। पवित्रं। कृवापाजिमिस्वदिसाध्यशूभ्य उण्। करोतीति का
रुः वायुः पायुः जायुः मायुः स्वादुः साध्नोति परकार्यमिति साधुः। आशु शीघ्रं ४५

मित्यादि तलोपस्येवाकुले यतेर्वर्तमानेसंज्ञायां बकुलंस्यः केचिदविहिता अप्प्रत्ययाः संज्ञायांघा
तव्यपाणिग्रहणयाश्चततःपरे कार्यादिर्यादनुबंधमेत्तकामसुणादिषु तुमुन्ण्वुलौक्रियायांक्रि
यार्थायां क्रियायामुपपदेधातोरेतौस्तः भोक्तुंव्रजतिभोजकोव्रजति (
कालसमयवेलासुतुमुन् कालःसमयोवेलावाभोक्तुं भावे सिद्धावस्थापन्नेधात्वर्थेवाच्ये
धातोर्घञ् पाकः घकारेत्वितिकारकेसंज्ञायां कर्तृभिन्नेकारकेघञ् एतेच भावकरणयोरं
जेर्नलोपः रागः अन्ययोःकिम् रज्यत्यस्मिन्निति रंगः निवासचितिशरीरोपसमाधानेष्वादेश्च
कः एषुचिनोतेर्घञ्आदेश्चकः उपसमाधानंराशीकरणं निकायः आकायः गोमयनिकायः
एरच् इवर्णांताद्धातोरच् चयः जयः उदोरप् उवर्णांतादृवर्णांताद्धातोरप् करः गरः शरः यवः ल
वः स्तवः पवः ग्रहवृदृनिश्चिगमश्च घञर्थेकविधानं नाम्न्याविघ्नः द्विताः क्ति क्त्रेर्मम्नित्यं क्त्रिप्रत्ययांतान्मप्रत्ययः
स्यात् पचेनानिर्वृत्तं पक्त्रिमं डुवप् वप्त्रिमं द्वितोऽथुच् ड्वेपृकम्पने वेपथुः श्वयथुः यजयाच
यतविच्छप्रच्छरक्षो नङ् यज्ञः याच्ञा यत्नः विश्नः प्रश्नः रक्ष्णः स्वपोनन् स्वप्नः उपसर्गे

ल० कौ० ७८ ग्लाक्तिः प्रधिः उपाधिः स्त्रियां क्तिन् स्त्रीलिङ्गे भावादौ क्तिन् घञोऽपवादः कृतिः ॠल्वादिभ्यः
क्तिः क्तिन्निष्ठावद्वाच्यः तेन नत्वं कीर्णिः गीर्णिः लूनिः धूनिः पूनिः संपदादिभ्यः क्विप् संपत्
विपत् आपत् क्तिन्नपीष्यते संपत्तिः विपत्तिः आपत्तिः ऊतियूतिजूतिसातिहेतिकीर्त
यश्च एते निपात्याः कुत्वः वत्व काम्या प्राप्त तन्त्रः चात् क्तिन् प्रकरणे प्रक्रिया प्रकिया प्रकृ
तिः इच्छा इषेर्निपातोऽयं अ प्रत्ययात् प्रत्ययान्तेभ्यः स्त्रियामकारः प्रत्ययः चिकीर्षा पुत्र
काम्या गुरोश्च हलः गुरुमतो हलन्तात् स्त्रियामप्रत्ययः ईहा ऊहा ण्यासश्रन्थो युच् अ
स्यापवादः कारणा नपुंसके भावे क्तः ल्युट् च हसितं हसनं पुंसि संज्ञायां घः प्रायेण ॥ ख
देर्घञ्युपसर्गस्य ॥ हिमश्रन्थ्योपसर्गे हीनस्य ... ईषत्स्वरः यदीति किं समञ्ज्याद्
अनुर्वत्यास्मिन्निति आकारः अवेस्तृस्त्रोर्घञ् अवतारः अवस्तारो जवनिका इत्यमरः हल
श्च हलन्ताद्घञ् घापवादः रमन्ते योगिनोऽस्मिन्निति रामः अपमृज्यतेऽनेन व्याध्यादिक
अपमार्गः ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ... तयोरेवेति
भावे कर्मणि च ... ईषत्करः भवता ... ईषत्करः ... भवता दुःपानः सुपानः ७८

मलंखल्वोः प्रतिषेधयोः प्राचांक्त्वा प्राचामिति विभाषार्थं प्रतिषेधार्थयोरलंखल्वोरुपपदयोःक्त्वा स्या
द्वाः अलंकृत्वा खुमासेमीतं पीत्वा खलु अलंखल्वोः किंमाङ्वार्थीः प्रतिषेधयोः किमलंकारः समा
नकर्तृकयोः पूर्वकाले समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोःक्त्वा भुक्त्वा व्रजति
द्वित्वमविवक्षितं स्नात्वा भुक्त्वा पीत्वा व्रजति नक्त्वा सेट् क्त्वा किल्लक्षयित्वा सेट्किं हत्वा रलो व्युप
धाद्धलादेः संश्च इवर्णोवर्णोपधाद्धलादेरलंतात्परौ क्त्वासनौ सेटौ वा किन्नस्तः फलित्वा योति
त्वा लेखित्वा व्युपधात्किं वर्तित्वा रलः किं सेवित्वा हलादेः किं एषित्वा सेट्किं भुक्त्वा उदितो वा उ
दितः परस्य क्त्व इड्वा शमित्वा शान्त्वा देवित्वा द्यूत्वा दधातेर्हिः हित्वा जहातेश्च हित्वा हाङस्तु
हात्वा समासेनञ्पूर्वे क्त्वो ल्यप् अव्ययपूर्वपदेनञ्समासे क्त्वो ल्यबादेशः तत्र प्रकृत्य अनञ् ।
किं अकृत्वा अव्ययपूर्वपदात्किं परमकृत्वा अभीक्ष्ण्ये णमुल् च पौनःपुन्ये द्योत्ये पदस्य द्वित्वं स्यात्
अभीक्ष्ण्ये णमुल् च तेष्वव्ययसंज्ञकृदन्तेषु च स्मारं स्मारं नमति शंभुं स्मृत्वा स्मृत्वा वा पायं पायं भोजं भो
जं श्रावं श्रावं अन्यथैवं कथमित्थंसु सिद्धाप्रयोगश्चेत् एषु कृञो णमुल् स्यात् सिद्धःप्रयोगोय
द्येवं भूतश्चेत् कृञ् अर्थत्वात्प्रयोगानर्हत्वमर्थः अन्यथाकारं एवंकारं कथंकारं इत्थंकारं

ल. कौ. ५१

इत्यंशुके स्मर्थः स्त्रियां नित्यं क्रियोऽन्यथा ऽन्यत्रांशुके ॥ इति कृदन्तप्रक्रिया ॥ प्रातिपदिकार्थलिंगप
रिमाणवचनमात्रे प्रथमा ॥ नियतोपस्थितिकः प्रातिपदिकार्थः मात्रशब्दस्य प्रत्येकं योगः प्राति
पदिकार्थमात्रे लिंगमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् प्रातिपदिकार्थमात्रे उच्चैः नीचैः कृ
ष्णः श्रीः ज्ञानं लिंगमात्रे द्रोणो व्रीहिः वचनं संख्या एकः द्वौ बहवः सम्बोधने च हे राम कर्तुरीप्सित
तमं कर्म कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् कर्मणि द्वितीया अनुक्ते कर्मणि द्वितीया
स्यात् हरिं भजति अभिहिते तु कर्मादौ प्रथमा हरिः सेव्यते लक्ष्म्या सेवितः अकथितं च अपादाना
दिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मु
षां कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहां गां दोग्धि पयः बलिं याचते वसुधां तण्डुलानो
दनं पचति गर्गाञ्छतं दण्डयति व्रजमवरुणद्धि गां माणवकं पन्थानं पृच्छति वृक्षमववि
नोति फलानि माणवकं धर्मं ब्रूते शास्ति वा शतं जयति देवदत्तं सुधां क्षीरनिधिं मथ्नाति देव
दत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वा अर्थनिबन्धनेयं संज्ञा बलिं भिक्षते वसुधां
माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि स्वतंत्रः कर्तेति कर्तृसंज्ञा साधकतमं करणं क्रि ५१

यासिद्धौ प्रकृष्टोपकारकं करणं स्यात् कर्तृकरणयोः तृतीया स्यात् रामेण बाणेन हतो वाली कर्मणा
यमभिप्रैति स सम्प्रदानः दानस्य कर्मणा यमभिप्रैति स संप्रदानसंज्ञः स्यात् चतुर्थी संप्रदाने विप्राय
गां ददाति नमः स्वस्ति स्वाहा स्वधालं वषड्योगाच्च एभिर्योगे चतुर्थी हरये नमः प्रजाभ्यः स्वस्ति अ
ग्नये स्वाहा पितृभ्यः स्वधा अलमिति पर्याप्त्यर्थग्रहणं तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्या
दि वषडिन्द्राय ध्रुवमपायेऽपादानं अपायो विश्लेषस्तस्मिन्साध्ये ध्रुवमवधिभूतमपादानं अपादाने पंचमी
ग्रामादायाति धावतोऽश्वात्पततीत्यादि षष्ठी शेषे कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभा
वादिसम्बन्धः शेषः तत्र षष्ठी राज्ञः पुरुषः कारकस्यापि सम्बन्धमात्रविवक्षायां षष्ठ्येव सतां गतं सर्पि
षो जानीते मातुः स्मरति एधोदकस्योपस्कुरुते भजे शंभोश्चरणयोः फलानां तृप्तः कर्तृकर्मणोः
कृति कृद्योगे कर्तरि कर्मणि च षष्ठी कृष्णस्य कृतिः जगतः कर्ता कृष्णः आधारोऽधिकरणं कर्तृकर्म
द्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं सप्तम्यधिकरणे च चाद्दूरान्तिकार्थेभ्यः औपश्लेषि
को वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा कटे आस्ते स्थाल्यां पचति मोक्षे इच्छास्ति सर्वस्मिन्नात्मा च
रति वनस्य दूरे अन्तिके वा इति विभक्त्यर्थः ॥ समासः पंचधा तत्र समसनं समासः स च विशेष

ल॰ कौ॰ ४८ संज्ञाविनिर्मुक्तः केवलसमासः प्रथमः प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः प्रायेणोत्त
रपदार्थप्रधानः तत्पुरुषस्तृतीयः तत्पुरुषभेदः कर्मधारयः तद्भेदो द्विगुः प्रायेणान्यपदार्थप्र
धानो बहुव्रीहिः चतुर्थः प्रायेणोभयपदार्थप्रधानो द्वंद्वः पंचमः समर्थः पदविधिः पदसंबंधी
यो विधिः समर्थाश्रितो बोध्यः प्राक्कडारात्समासः कडाराः कर्मधारये इत्यतः प्राक्समास इत्य
धिक्रियते सह सुपा सुप् सुपा सह वा समस्यते समासत्वात्प्रातिपदिकत्वेन सुपो लुक् परा।
र्थाभिधानं वृत्तिः कृत्तद्धितसमासैकशेषसनाद्यंतधातुरूपाः पंच वृत्तयः वृत्त्यर्थावबोधकं वाक्यं वि
ग्रहः स च लौकिकोऽलौकिकश्चेति द्विधा तत्र पूर्वं भूत इति लौकिकं विग्रहार्थं पूर्व अम् भूत सु इत्य।
लौकिकः तत्र समासे कृते भूतपूर्वे चरट् इति ज्ञापकाद्भूतशब्दस्य पूर्वनिपातः भूतपूर्वः इवेन नित्य
समासो विभक्त्यलोपश्च वागर्थाविव इति केवलसमासः अव्ययीभावः अधिकारोऽयं प्राक्तत्पुरुषा
त् अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगप
द्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु विभक्त्यर्थादिषु वर्तमानमव्ययं सुबंतेन सह नित्यं
समस्यते अविग्रहो नित्यसमासः अस्वपदविग्रहो वा विभक्तौ हरि ङि अधि इति स्थिते प्रथमानि ४८

दिष्टं समास उपसर्जनं समासशास्त्रे प्रथमानिर्दिष्टं उपसर्जनं स्यात् उपसर्जनं पूर्वं समासे उपसर्जनं
प्राक् प्रयोज्यमित्यधेः प्राक् प्रयोगः सुपो लुक् एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकसंज्ञायां स्वाद्यु
त्पत्तिः अव्ययीभावश्च अव्ययत्वात् सुपो लुक् अधिहरि नाव्ययीभावादतोऽम्त्वपंचम्याः अदन्तादव्ययी
भावात् सुपो न लुक् तस्य पंचमीं विना अमादेशः कृष्णस्य समीपमुपकृष्णं तृतीयासप्तम्योर्बहुलं अ
दन्तादव्ययीभावाद्बहुलं उपकृष्णेनोपकृष्णं उपकृष्णे उपकृष्णं मद्राणां समृद्धिः सुमद्रं यवनानां
व्यृद्धिः दुर्यवनं अव्ययीभावश्च नपुंसकं मक्षिकाणामभावो निर्मक्षिकं हिमस्यात्ययो अतिहिमं।
निद्रा संप्रति न युज्यत इति अतिनिद्रं हरिशब्दस्य प्रकाश इतिहरि विष्णोः पश्चादनुविष्णु योग्यतावीप्सा
पदार्थानतिवृत्तिसादृश्यानि यथार्थाः रूपस्य योग्यमनुरूपं अर्थमर्थं प्रति प्रत्यर्थं शक्तिमनति
क्रम्य यथाशक्ति अव्ययीभावे चाकाले सहस्य सः स्यादव्ययीभावे न तु काले हरेः सादृश्यं स
हरि ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं चक्रेण युगपत् सचक्रं सदृशः सख्या ससखि क्षत्राणां संप
त्तिः सक्षत्रं तृणमप्यपरित्यज्य सतृणं अग्निग्रन्थपर्यन्तमधीते साग्नि नदीभिश्च संख्या वा समस्य
ते समाहारे चायमिष्यते पंचगंगं द्वियमुनं तद्धिताः आपंचमसमाप्तेरधिकारोयं तद्धिताः अव्य

ल: कौ ५९

यीभावे शरत्प्रभृतिभ्यः शरदादिभ्यष्टच् स्यात्समासांतोऽव्ययीभावे शरदः समीपं उपशरदं प्र
तिविपाशं जराया जरश्च उपजरसमित्यादि अनश्च अन्नंतादव्ययीभावात्टच् नस्तद्धिते नांतस्य
भस्य टेर्लोपस्तद्धिते उपराजं अध्यात्मं नपुंसकादन्यतरस्यां अन्नंतं यत्क्लीबं तदंतादव्ययी
भावात् टच् वा उपचर्मं उपचर्म झयः झयंतादव्ययीभावात् टच् वा उपसमिधं उपसमित्
इत्यव्ययीभावः तत्पुरुषः अधिकारोयं प्राग्बहुव्रीहेः द्विगुश्च तत्पुरुषसंज्ञकः द्वितीयाश्रि
तातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयांतं श्रितादिप्रकृतिकैः सुबंतैः सह वा समस्यते
कृष्णं श्रितः कृष्णश्रितः इत्यादि तृतीया तत्कृतार्थेन गुणवचनेन तृतीयांतं तृतीयांतार्थकृत
गुणेनार्थेन च सह प्राग्वत् शंकुलया खंडः शंकुलाखंडः धान्येनार्थो धान्यार्थः तत्कृतेन किं
अक्ष्णा काणः कर्तृकरणे कृता बहुलं कर्तरि करणे च तृतीया कृदंतेन बहुलं प्राग्वत् हरिणा
त्रः नखैर्भिन्नः कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं नखनिर्भिन्नः चतुर्थी तदर्थार्थबलि
हितसुखरक्षितैः चतुर्थ्यंतं तदर्थवाचिनार्थादिभिश्च चतुर्थ्यंतं वा प्राग्वत् यूपाय दारु यूपदारु ।
तदर्थेन प्रकृतिविकारभाव एवेष्टः तेनेह न रंधनाय स्थाली अर्थेन नित्यसमासो विशेष्य ५९

लिंगताचेति वक्तव्यं द्विजायायं द्विजार्थः सूपः द्विजार्था यवागूः द्विजार्थं पयः भूतबलिः गोहितं
गोसुखं गोरक्षितं पंचमी भयेन चौराद्भयं चौरभयं स्तोकांतिकार्थदूरार्थकृच्छ्राणि क्तेन पंच
म्याः स्तोकादिभ्यः अलुक् उत्तरपदे परतः स्तोकान्मुक्तः अल्पान्मुक्तः अंतिकादागतः अ
भ्याशादागतः दूरादागतः कृच्छ्रादागतः षष्ठी सूत्रेणैव प्राप्तवान् राज्ञः पुरुषः राजपुरुषः
सर्वोपाधयोऽन्तरमेवादेशिनैकाधिकरणे अव्ययविनाम्ना सह सर्वो द्वंद्वः समसंख्ये एकत्व
संख्याविशिष्टः चेद्दवयवी षष्ठीसमासापवादः पूर्वं कायस्य पूर्वकायः एकाधिकरणे
किं पूर्वः छात्राणां अर्धं चार्धं द्वंद्वः अनेकं सुबंतं चार्थे वर्तमानं वा समस्यते स द्वंद्वः समुच्च
यान्वाचयेतरेतरयोगसमाहाराश्चार्थाः तत्रेश्वरं गुरुं च भजस्व इति परस्परनिरपेक्षस्यानेकस्य
कस्मिन्नन्वयः समुच्चयः भिक्षामट गां चानयेत्यन्यतरस्यानुषंगिकत्वेनान्वयोऽन्वाचयः ।
अनयोरसामर्थ्यात्समासो न धवखदिरौ छिंदीति मिलितानामन्वय इतरेतरयोगः सं
हापरिभाषमिति समूहः समाहारः राजदंतादिषु परं एषु पूर्वप्रयोगार्हं परं स्यात् दंता
नां राजा राजदंतः धर्मादिष्वनियमः अर्थधर्मौ धर्मार्थौ इत्यादि द्वंद्वे घि पूर्वं स्यात् हरिहरौ

ल॰ कौ॰ ५॰

अजापदंतं ईशकृष्णौ वस्त्रावुरं शिवकेशवौ द्वंद्वश्च प्राणितूर्यसेनांगानां प्राण्यंगद्वंद्व एकवत् पाणि
पादं मार्दंगिकपाणविकं रथिकाश्वारोहं सर्वोपि द्वंद्वो विभाषैकवद्भवति द्वंद्वाच्चुदषहान्तात्समाहा
रे वाक्त्वचं त्वक्स्रजं शमीदृषदं वाक्त्विषं छत्रोपानहं समाहारे किं प्रावृट्शरदौ इति द्वंद्वः ऋक्पू
रब्धूःपथामानक्षे ऋगाद्यंतस्य समासस्य अप्रत्ययोंतावयवः अक्षे या धूस्तदंतस्य न अर्धर्चः अनृ
चबह्वृचावध्येतर्येव नेह अनृक्साम बह्वृक्सूक्तं विष्णुपुरं विमलापं सरः द्व्यंतरुपसर्गेभ्योप ईत्
द्वीपं अंतरीपं समीपं अवर्णांताद्वा प्रेपं प्रापं ऊदनोर्देशे अनूपो देशः राजधुरं अक्षे तु अक्षधूः
दृढधूरक्षः सखिपथः रम्यपथः अक्ष्णोऽदर्शनात् अवक्षः पथो याद्दृष्णोऽच् स्यात् गवामक्षीव गवा
क्षः उपसर्गादध्वनः प्राणेनाध्वानं प्राध्वो रथः न पूजनात् पूजनार्थात्परेभ्यः समासांता न स्युः सु
राजा अतिराजा स्वतिभ्यामेव नेह परमराजः पथो विभाषा नञ्पूर्वात्पथो वा समासांतः अ
पथं अपंथाः इति समासांताः समर्थानां प्रथमाद्वा इदमधिक्रियते प्राग्दिश इति यावत् प्रा
ग्दीव्यतोऽण् तेन दीव्यतीत्यतः प्रागणधिक्रियते अश्वपत्यादिभ्यश्च एभ्योऽण् स्यात् प्राग्दीव्य
तीयेष्वर्थेषु अश्वपतेरपत्यादि आश्वपतं गाणपतं दित्यादित्यपत्युत्तरपदाण्ण्यः प्राग्दीव्यतीये ५॰

स्वार्थेषु दितेरपत्यादिर्दैत्यः अदितेरादित्यस्य वा आदित्यः प्राजापत्यः देवाद्यञञौ दैव्यं दैवं वहि
षष्टिलोपो यञ्च बाह्यः ईकक्च किति च अचामादेर्वृद्धिः किति तद्धिते वाहीकः गोरजादिप्र
संगे यत् गोरपत्यादि विकारांतार्थाः प्रत्ययाः स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् धान्यानां भवन इत्य
तः प्रागर्थेष्वाभ्यामेतौ स्तः स्त्रैणः पौंस्नः तस्यापत्यं षष्ठ्यंतात्कृतसंधेः समर्थादपत्येर्थे उक्ताव
क्ष्यमाणाश्च प्रत्यया वा स्युः ओर्गुणः उवर्णांतस्य भस्य गुणः तद्धिते उपगोरपत्यमौपगवः आश्व
पतः दैत्यः औत्सः स्त्रैणः पौंस्नः अपत्यं पौत्रप्रभृति गोत्रं अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं।
स्यात् एको गोत्रे गोत्रे एक एव प्रत्ययः स्यात् उपगोर्गोत्रापत्यमौपगवः गर्गादिभ्यो यञ् गोत्रा
पत्ये गर्गस्य गोत्रापत्यं गार्ग्यः वात्स्यः यञञोश्च गोत्रे यद्यञन्तमञन्तं च तदंतयोरवयवयोरेतयोर्लु
क् न तत्कृते बहुत्वे न तु स्त्रियां गर्गाः वत्साः जीवति तु वंश्ये युवा वंश्ये पित्रादौ जीवति पौत्रादेर्यदप
त्यं चतुर्थादि तद्युवसंज्ञमेव स्यात् गोत्राद्यून्यस्त्रियां यून्यपत्ये गोत्रप्रत्ययांतादेव प्रत्ययः स्यात् स्त्रि
यां तु न युवसंज्ञा यञिञोश्च गोत्रे यौ यञिञौ तदंतात्फक् आयनेयीनीयियः फढखछघां प्रत्य।
यादीनां प्रत्ययादेः फस्य आयन् ढस्य एय् खस्य ईन् छस्य ईय् घस्य इय् स्युः गर्गस्य युवापत्यं गा

ल॰
कौ॰
५१

यणः दाक्षायणः अत इञ् अपत्येऽर्थे दाक्षिः बाह्वादिभ्यश्च बाहविः औडुलोमिः औडुलोमी लोम्नोऽप
त्येषु बहुष्वकारो वक्तव्यः बह्वादीञोऽपवादः उडुलोमाः आकृतिगणोऽयं अनृष्यानन्तर्ये विदादिभ्योऽञ्
ये त्वनन्तरापत्येभ्योऽपत्ये अन्यत्र गोत्रे विदस्य गोत्रं वैदः वैदौ विदाः पुत्रस्यापत्यं पौत्रः पौत्रौ यञिञो
श्च तस्मिन्नेव पूर्वाध्यायप्रसिद्धे गोत्रे तेनेष्टन पौत्राः एवं दौहित्रादयः शिवादिभ्योऽण् अपत्ये शैवः।
गाङ्गः ऋष्यन्धकवृष्णिकुरुभ्यश्च ऋषिभ्यः वासिष्ठः वैश्वामित्रः अन्धकेभ्यः श्वाफल्कः वृष्णिभ्यः।
वासुदेवः कुरुभ्यः नाकुलः साहदेवः मातुरुत्संख्यासंभद्रपूर्वायाः संख्यादिपूर्वस्य मातृश
ब्दस्यान्तादेशः स्यादण् प्रत्ययश्च द्वैमातुरः गणाधिपाद्यन्यमरः षाण्मातुरः शक्तिधरः कु
मारः सांमातुरः भाद्रमातुरः स्त्रीभ्यो ढक् स्त्रीप्रत्ययान्तेभ्यो ढक् वैनतेयः कन्यायाः कनी
न च वादरायण कानीनो व्यासः कर्णश्च राजश्वशुराद्यत् राज्ञो जातावेव येषामभावकर्मणोऽन्या
दौ न हि तेन अत्र तु व्यासस्यानभिषेककर्मणाः राजन्यः जातावेवेति किं अत्र प्रकृत्याणि परे राजा
नः श्वशुर्यः द्वयाह्वः क्षत्रियः जातावेव क्षत्रियः रेवत्यादिभ्यष्ठक् ठस्येकः अत्रत्यस्य ठस्य
कादेशः रैवतिकः क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् पंचालानां राजा पांचालः ५१।

पूरोरपत्यं पौरवः पांडोरपत्यं पांड्यः कुरुनादिभ्यो ण्यः कौरव्यः नैषध्यः तेतद्राजाः अणादयः
तद्राजसंज्ञाः स्युः तद्राजस्य बहुषु तेनैवास्त्रियां बहुत्वे तद्राजस्य लुक् तत्कृते बहुत्वे न तु
स्त्रियां पंचालाः इत्यादि कम्बोजाल्लुक् कम्बोजः कम्बोजौ कम्बोजाः आदिभ्य इति वक्तव्यं चोलः
शकः केरलः यवनः इत्यपत्याधिकारः तेन रक्तं रागात् काषायेण रक्तं वस्त्रं काषायं नक्ष
त्रेण युक्तः कालः तिष्यपुष्ययोर्नक्षत्राणि यलोपः पुष्येण युक्तं पौषमहः लुबविशेषे पू
र्वेण विहितस्य लुप् षष्टिदण्डात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते अद्य पुष्यः दृ
ष्टं साम तेनेत्येव वसिष्ठेन दृष्टं वासिष्ठं साम वामदेवाड्ड्यड्ड्यौ वामदेवेन दृष्टं साम वा
मदेव्यं परिवृतो रथः वस्त्रेण परिवृतो वास्त्रो रथः तत्रोद्धृतममत्रेभ्यः शरावे उद्धृतः शारा
वः ओदनः संस्कृतं भक्षाः सप्तम्यन्तादण् स्यात् संस्कृतेऽर्थे यत्संस्कृतं भक्ष्याश्चेत्ते स्युः भ्राष्ट्रे
षु संस्कृताः भ्राष्ट्रा धानाः साऽस्य देवता इंद्रो देवतास्येति ऐन्द्रं हविः पाशुपतं बार्हस्पत्यं शु
क्रात् घन् शुक्रियं सोमाट्ट्यण् सौम्यं वाय्वृतुपित्रुषसो यत् वायव्यं ऋतव्यं अकृद्यकारे
सार्वधातुके यकारे च परे ऋतो रीङादेशः पित्र्यं उषस्यं पितृव्यमातुल

मातामहपितामहाः एतेन निपात्यन्ते पितृभ्राता पितृव्यः मातृभ्राता मातुलः मातुः पिता
मातामहः पितुः पिता पितामहः तस्य समूहः काकानां समूहः काकं भिक्षादिभ्योऽण् भै
क्षं गर्भिणीनां समूहो गार्भिणं इह भस्याढे तद्धिते पुंवद्भाववचनात् पुंवद्भावे कृते इनण्यनपत्ये
इत्यनपत्यार्थेऽणि इनः प्रकृत्या तेन तस्य नटिलोपेन युवतीनां समूहो यौवनं ग्रामज
नबन्धुभ्यस्तल् तलन्तं स्त्रियां ग्रामता जनता बन्धुता गजसहायाभ्यां चेति वक्तव्यं गजता
सहायता अह्नः खः क्रतौ अहर्गणोऽरेव टिलोपः अहः समूह साध्यः अहीनः अचित्तह
स्तिधेनोष्ठक् इसुसुक्तान्तात्कः इस् उस् उक् त् एतदन्तानाम्यस्य ठस्य कः साक्तुकं हा
स्तिकं धैनुकं तदधीते तद्वेद तथाभ्यां वर्त्तनाभ्यां प्रवैगानुताभ्यामेव पदान्ताभ्यां यथाभ्यां
प्रत्ययविधिः किं तताभ्यां प्रवैगमाऽस्त्वावगमोऽस्तु व्याकरणमधीते वेत्ति वा वैयाकर
णः क्रमादिभ्यो वुन् क्रमकः शिक्षकः मीमांसकः तदस्मिन्नस्तीति देशे तन्नाम्नि उ
दुम्बराः सन्त्यस्मिन्देशे औदुम्बरो देशः तेन निर्वृत्तं कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी त
स्य निवासः शिवीनां निवासो देशः शैवः अदूरभवश्च विदिशाया अदूरभवं नगरं वैदि ५२

यं जनपदे लुप् जनपदे वाच्ये चातुरर्थिकस्य लुप् लुपि युक्तवद्व्यक्तिवचने लुपि सति
प्रकृतिवल्लिंगवचने स्तः पंचालानां निवासो जनपदः पंचालाः कुरवः अंगाः वंगाः क
लिंगाः वरणादिभ्यश्च अजनपदार्थ आरंभः वरणानामदूरभवं नगरं वरणाः कुमुदनड
वेतसेभ्यो ड्मतुप् झयः झयन्तान्मतोर्मस्य वः कुमुद्वान् नड्वान् मादुपधायाश्च मतोर्वोऽयवा
दिभ्यः अवर्णावर्णान्तादवर्णोपधाच्च यवादिवर्जितान्मतोर्मस्य वः वेतस्वा
न् नडशादाड्ड्वलच् नड्वलः शाद्वलः शिखाया वलच् शिखावलः इति चातुरर्थि
काः शेषे अपत्यादिचतुरर्थ्यान्तादन्योऽर्थः शेषः तत्राणादयः स्युः चक्षुषा गृह्यते चाक्षु
षं रूपं श्रावणः शब्दः औपनिषदः पुरुषः दृषदि पिष्टा दार्षदाः सक्तवः उलूखले क्षुण्ण
औलूखलो यावकः अश्वैरुह्यते आश्वो रथः चतुर्भिरुह्यते चातुरं शकटं चतुर्दश्यां दृश्य
ते चातुर्दशो राक्षसः तस्य विकार इत्यतः प्राक् शेषाधिकारः राष्ट्रावारपाराद्घखौ रा
ष्ट्राद्घः अवारपारात् खः राष्ट्रियः अवारपारीणः अवारपाराद्विगृहीतादपि वि
परीताच्चेति वक्तव्यम् अवारीणः पारीणः पारावारीणः इह प्रकृतिविशेषाद्धानवा।

53

ल॰ कौ॰ ५२

ष्युलन्ता उच्यन्ते तेषां नानादयोर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते ग्रामाद्यखञौ ग्राम्यः।
ग्रामीणः नद्यादिभ्यो ढक् नादेयं माहेयं वाराणसेयं दक्षिणापश्चात्पुरसस्त्यक् दाक्षिणा
त्यः पाश्चात्यः पौरस्त्यः द्युप्रागपागुदक्प्रतीचो यत् दिव्यं प्राच्यं अवाच्यं उदीच्यं प्रतीच्यं
कंथायाष्ठक् कांथिकः अव्ययात्त्यप् अमेहक्वतसित्रेभ्य एव अमान्तिकसहार्थयोः अमा ध॰
त्यः इहत्यः क्वत्यः ततस्त्यः तत्रत्यः त्यब्नेर्ध्रुव इति नित्यः वृद्धिर्यस्याचामादिस्तद्वृद्धम्
यस्य समुदायस्याचां मध्ये आदिर्वृद्धिः तद्वृद्धसंज्ञं स्यात् त्यदादीनि च वृद्धसंज्ञानि स्युः वृद्धा
च्छः शालीयः नदीयः वा नामधेयस्य वृद्धसंज्ञा देवदत्तीयः दैवदत्ताः गहादिभ्यश्च ग
हीयः युष्मदस्मदोरन्यतरस्यां खञ्च चाच्छः पक्षेऽण् युवयोर्युष्माकं वा युष्मदीयः अ
स्मदीयः तस्मिन्नणि च युष्माकास्माकौ युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च यौ
ष्माकीणः आस्माकीनः यौष्माकः आस्माकः तवकममकावेकवचने एकार्थवाचि
नोः युष्मदस्मदोः तवकममकौ स्तः खञि अणि च तावकीनः तावकः मामकीनः मा
मकः केवलयोरुत्तरपदयोश्च मपर्यन्तयोरनयोरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये ५२

उत्तरपदे च त्वदीयः मदीयः त्वत्कः मत्कः मध्यात्मः मध्यमः कालाट्ठञ् मासिकं सांव
त्सरिकं अव्ययानां भमात्रे टिलोपः सायंप्रातिकः पौनःपुनिकः प्रावृष एण्यः प्रावृषेण्यः
संधिवेलाद्यृतुनक्षत्रेभ्योऽण् संधिवेलायां भवं सांधिवेलं ग्रैष्मं तैषं तिष्यपुष्ययोरिति
यलोपः सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च सायमित्यादिचतुर्भ्यो अव्ययेभ्यश्च (
कालवाचिभ्यः ट्युट्युलौ तयोस्तुट् च प्रागतादेशः सायंतनं चिरंतनं प्राह्णप्रगयोरेद
न्तत्वं निपात्यते प्राह्णेतनं प्रगेतनं दोषातनं दिवातनं तत्र जातः सप्तमीसमर्थाज्जात इत्य
र्थे अणादयो यथायथं स्युः स्रुघ्ने जातः स्रौघ्नः औत्सः राष्ट्रियः अवारपारीणः इत्यादि प्रावृष
ष्ठक् एण्यस्यापवादः प्रावृषिकः प्रायभवः तत्रैव स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौ
घ्नः सम्भूते स्रुघ्ने प्रायेण बाहुल्येन संभवति स्रौघ्नः कोशाड्ढञ् कौशेयं वस्त्रं तत्र भवः स्रौ
घ्नः औत्सः राष्ट्रियः दिगादिभ्यो यत् दिश्यं वर्ग्यं शरीरावयवाच्च दन्त्यं कण्ठ्यं अध्यात्मा
देष्ठञ् इष्यते अध्यात्मभवं आध्यात्मिकं अनुशतिकादीनां च एषामुभयपदवृद्धिः त्रि
त्रिलिङ्गिकानि च आधिदैविकं आधिभौतिकं ऐहलौकिकं पारलौकिकं आह्निक

त: कौ: ५४

गीयं जिह्वामूलांगुलेश्छः जिह्वामूलीयं वर्गान्ताच्च कवर्गीयं ततआगतः स्रुघ्नादागतः स्रौ
घ्नः ठगायस्थानेभ्यः शुल्कशालाया आगतः शौल्कशालिकः विद्यायोनिसंबंधेभ्यो वुञ्।
औपाध्यायकः पैतामहकः हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः समादागतं समरूप्यं पदे गेह
रिताश्छः समीयं देवदत्तरूप्यं देवदत्तीयं हेतौ पंचमी मयट्च सममयं देवदत्तमयं प्र
भवति हिमवतः प्रभवति हैमवती गंगा तद्गच्छति पथिदूतयोः स्रुघ्नं गच्छतीति स्रौघ्नः
पंथा दूतो वा अभिनिःक्रामति द्वारं स्रुघ्नमभिनिःक्रामतीति स्रौघ्नं कान्यकुब्जद्वारं अधि
कृत्य कृते ग्रंथे शारीरमधिकृत्य कृतो ग्रंथः शारीरकीयः सोऽस्य निवासः स्रुघ्नो निवासोऽस्य
स्रौघ्नः तेन प्रोक्तं पाणिनिना प्रोक्तं पाणिनीयं तस्येदं उपगोरिदमौपगवं इति शैषिकाः तस्य
विकारः अश्मनो विकारे टिलोपः अश्मनो विकार आश्मः भास्मनः मार्त्तिको घटः अवय
वे च प्राण्योषधिवृक्षेभ्यः चाद्विकारे मयूरस्य विकारोऽवयवो वा मायूरः मौर्वं कांडं भ
स्म वा पैप्पलं मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः अश्मनि मात्रात्मयड्वा स्याद्विका
रावयवयोः अश्ममयं आश्मानं अभक्ष्यादिकं मौद्गः सूपः कार्पासमाच्छादनं नित्यं ५४

हृदपगादिभ्यः आम्रमयं शरमयं गोश्च पुरीषे गोमयं गोपयसोर्यत् गव्यं पयस्यं इति प्राक्
दीव्यतीयः प्राग्वहतेष्ठक् उद्वहतीत्यतः प्राक् ठगधिक्रियते तेन दीव्यति खनति जयति जितं ।
अक्षैर्दीव्यति खनति जयति जितं वा आक्षिकः संस्कृतं दध्ना संस्कृतं दाधिकं मारिचिकं तर
ति उडुपेन तरति औडुपिकः चरति हस्तिना चरति हास्तिकः दध्ना चरति दाधिकः संसृष्टे
दध्ना संसृष्टं दाधिकं उञ्छति बदराण्युञ्छति बादरिकः रक्षति समाजं रक्षति सामाजिकः
शब्ददर्दुरं करोति शब्दं करोति शाब्दिकः दर्दुरं करोति दार्दुरिकः धर्मं चरति धार्मिकः अ
धर्माच्चेति वक्तव्यं आधर्मिकः शिल्पं मृदंगवादनं शिल्पमस्य मार्दिंगिकः प्रहरणं असिः
प्रहरणमस्य आसिकः धानुष्कः शीलं अपूपभक्षणं शीलमस्य आपूपिकः छत्रादिभ्यो
णः गुरोर्दोषाणामावरणं छत्रं तच्छीलमस्येति छात्रः तत्र नियुक्तः आकारे नियुक्तः आका
रिकः निकटे वसति नैकटिको भिक्षुः इति ठगधिकारः प्राग्घिताद्यत् तस्मै हितमित्यतः
प्राग्यदधिक्रियते तद्वहति रथयुगप्रासंगिकं रथं वहति रथ्यः युगं वहति युग्यः धुरो यड्
ढकौ धुर्यः धौरेयः नौवयोधर्ममूलमूलसीतातुलाभ्यस्तार्यतुलप्राप्यवध्यानाम्यसम

मौक्तिकं नसेमिनेष्ठ नावा नार्यं नाव्यं वयसा तुल्यो वयस्यः धर्मेण प्राप्यं धर्म्यं विषेण वध्यो वि
ष्यः मूलेन आनाम्यं मूल्यं मूलेन समो मूल्यः सीतया समितं सीत्यं क्षेत्रं तुलया समितं तुल्यं
तत्र साधुः सामसु साधुः सामान्यः सभ्यः कर्मण्यः शरण्यः सभायां यः सभ्यः इति पतेऽव
धिः प्राक् क्रीतात् छः तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते उगवादिभ्यो यत् उवर्णान्ताद्गवादि
भ्यश्च यत् स्यादपवादः गव्यं हविष्यं तस्मै हितं वत्सेभ्यो हितो वत्सीयो गोधुक् प्राकरं
दारं गव्यं हविष्यं शरीरावयवाद्यत् दन्त्यं कण्ठ्यं नस्यं आत्मन्विश्वजनभोगोत्तरपदात् खः
आत्माध्वानौ खे एतौ खे प्रकृत्या स्तः आत्मने हितं आत्मनीनं विश्वजनीनः मातृभोगीणः
कुपनोः सर्वेणो वधिः प्राग्वतेष्ठञ् तेन तुल्यमित्यतः प्राक् ठञधिक्रियते आर्हादगोपुच्छसं
ख्यापरिमाणाट्ठक् तेन क्रीतं ठञ् सप्तत्या क्रीतं साप्ततिकं प्रास्थिकं तस्येश्वरः सर्वभूमि
पृथिवीभ्यामणञौ स्तः अनुशतिकादीनां च सर्वभूमेरीश्वरः सार्वभौमः पार्थिवः पं
क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतं एते रूढिशब्दा निपा
त्यन्ते तदर्हति श्वेतच्छत्रमर्हतीति योग्यः श्वैतच्छत्रिकः दण्डादिभ्यः यत् दण्डमर्हतीति दं

ग्यः अर्थः वध्यः तेन निर्वृत्तं अक्षानिर्वृत्तं आक्षिकं इति ठञोऽवधिः तेन त्वतलौ भावे इति आस
त्रेन तत्वं वा स्त्रगणवदधीते क्रियावेत्ति गुणत्वस्य माभूत् पुंस्त्रेण तलः स्मृतः तत्र तस्येव म
थुरायामिव मथुरावत् स्रुघ्ने प्राकारः चैत्रस्येव चैत्रवत् मैत्रस्य गावः तस्य भावस्त्वतलौ प्र
कृतिजन्यबोधप्रकारो भावः गोर्भावो गोत्वं गोता नत्वं तत्वं स्त्रियां त्वान्तं क्लीबं आ च त्वात् आ
त्वेन सह इत्यतः प्राक् त्वतलावधिक्रियेते अपवादैः सह समावेशार्थमिदं चकारेण नञ्स्न
ञ् भावस्यापि समावेशार्थं स्त्रियो भावः स्त्रैणं स्त्रीत्वं स्त्रीता पौंस्नं पुंस्त्वं पुंस्ता पृथ्वादिभ्य इमनि
ज्वा वावचनमणादिसमावेशार्थं रृतो हलादेर्लघोः टेरिमेयस्सु टेर्लोपः इष्ठेमेयस्सु पृथु
मृदुभृशकृशदृढपरिवृढानामेव रत्वं पृथोर्भावः प्रथिमा इष्ठेनाद्युक्तं सर्वाङ्गं पार्थि
वं म्रदिमा मार्दवं वर्णदृढादिभ्यः ष्यञ् च वा इमनिच् शौक्ल्यं शुक्लिमा दार्ढ्यं द्रढिमा गुण
वचनब्राह्मणादिभ्यः कर्मणि च चाद्भावे जडस्य भावः कर्म वा जाड्यं मौढ्यं ब्राह्मण्यं आर्ह
त्यं सख्युर्यः सख्यं कपिज्ञात्योर्ढक् कापेयं ज्ञातेयं पत्यन्तपुरोहितादिभ्यो यक्
सैनापत्यं पौरोहित्यं इति नञ्स्नञोरधिकारः धान्यानां भवने क्षेत्रे खञ् मुद्गानां भवनं क्षेत्रं मौ

ह्रीनं व्रीहिशाल्योर्ढक् वैहेयं शैलेयं हैयंगवीनं संज्ञायां नवनीते निपातोयं तदस्य संजातं ता
रकादिभ्य इतच् तारकाः संजाता अस्य तारकितं नभः पण्डितः आर्द्रे निपातोयं प्रमाणे द्वयस
ज्दघ्नञ्मात्रचः ऊरुप्रमाणमस्य ऊरुद्वयसं ऊरुदघ्नं ऊरुमात्रं यत्तदेतेभ्यः परिमाणे वतुप् यत्परि
माणमस्य यावान् तावान् एतावान् संख्याया अवयवे तयप् पंचावयवा अस्य पंचतयं द्वि
त्रिभ्यां तयस्यायज्वा द्वयं द्वितयं त्रयं त्रितयं उभादुदात्तो नित्यं उभशब्दात्तयपो यच् स्यात् सचा
द्युदात्तः उभयं तस्य पूरणे डट् एकादशानां पूरण एकादशः नान्तादसंख्यादेर्मट् इति मडा
गमः पंचानां पूरणः पंचमः नान्तात् किं नेविंशतेर्डिति विंशतेर्भस्य तिशब्दस्य लोपो डिति प
रे विंशः असंख्यादेः किं एकादशः षट्कतिकतिपयचतुरां थुक् इति षष्ठां पूरणः षष्ठः
कतिपयशब्दस्यापि डट् कतिपयथः चतुर्थः द्वेस्तीयः इत्यपवादः द्वयोः पूरणो द्वितीयः
त्रेः संप्रसारणं च तृतीयः श्रोत्रियंश्छन्दोधीते श्रोत्रियः वेत्यनुवृत्तेश्छान्दसः पूर्वादिनिः पूर्वं
ज्ञातमनेन पूर्वी सपूर्वाच्च कृतपूर्वी इष्टादिभ्यश्च इष्टमनेन इष्टी अधीती तदस्यास्त्यस्मिन्नि
ति मतुप् गावोऽस्यास्मिन्वा संति गोमान् तसौ मत्वर्थे तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये ५९

संप्रसारणं विदुष्मान् गुणवचनेभ्यो मतुपो लुग्विधेः शुक्लो गुणोऽस्यास्तीति शुक्लः पटः ह्रसः प्राणिस्थादातो
लजन्यतरस्यां चूडालः चूडावान् प्राणिस्थात्किं शिखावान्दीपः प्राण्यंगादेवेनेह मेधावान् लोमादिपा
मादिपिच्छादिभ्यः शनेलचः लोमादिभ्यः शः लोमवान् लोमशः पामादिभ्यो नः पामनः अंगात्कल्याणे
अंगना लक्ष्म्या अ लक्ष्मणः पिच्छादिभ्य इलच् पिच्छिलः पिच्छवान् दंत उन्नत उरच् उन्नता दंता अस्य।
दंतुरः केशाद्वोऽन्यतरस्यां केशवः केशवान् अन्येभ्योऽपि दृश्यते मणिवः अर्णसो लोपश्च अर्णवः अ
त इनिठनौ दंडी दंडिकः व्रीह्यादिभ्यश्च व्रीही व्रीहिकः अस्मायामेधास्रजो विनिः यशस्वी यशस्वान् मा
यावी मेधावी स्रग्वी वाचो ग्मिनि वाग्मी अर्शआदिभ्योऽच् अर्शसः आकृतिगणोऽयं इति मत्वर्थीयाः
प्राग्दिशो विभक्तिः दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः अव्ययसार्थिकाः।
किंसर्वनामबहुभ्यो द्व्यादिभ्यः इति प्राग्दिशोऽधिक्रियते पंचम्यास्तसिल् पंचम्यन्तेभ्यः किमादिभ्यः तसिल् वा स्या
त् कुतिहोः किमः कुः कस्मात् नादेहादेवविभक्तौ कुतः कस्मात् इदम इश् प्राग्दिशीये इतः एतदोऽन्
एतदः प्राग्दिशीये अनेकाल्त्वात्सर्वादेशः अतः अमुतः यतः ततः बहुतः द्व्यादेस्तु दाभ्यां पर्यभिभ्यां
च तसिल् परितः सर्वत इत्यर्थः अभितः उभयत इत्यर्थः सप्तम्यास्त्रल् कुत्र यत्र बहुत्र इदमो हः अलोपवाद :

इह किमोत् वास्मात् क्वाति किमः क्वः अत्र इतराभ्योपि दृश्यंते पंचमीसप्तमीतरविभक्त्यंतादपि तसि
लादयो दृश्यंते दृशिग्रहणाद्भवदादियोगायेव सभवान् ततोभवान् तत्रभवान् तंभवंतं ततोभवंतं त
त्रभवंतं एवं दीर्घायुः देवानांप्रियः आयुष्मान् सर्वैकान्यकिं यत्तदः काले दा सप्तम्यंतेभ्य एभ्यः काला
र्थेदास्यात् सर्वस्य सोन्यतरस्यां दि शादौ प्राग्दिशीये सर्वस्य सो वा सर्वस्मिन्काले सदा सर्वदा एकदा
अन्यदा कदा यदा तदा काले किं सर्वत्र देशे इदमो र्हिल् सप्तम्यंतात् एतेतौ रथोः इदम एतेतौ स्तः र
फादौ थकारादौ च प्राग्दिशीये परे अस्मिन्काले एतर्हि काले किं इह देशे अधुना इदमो निपातो
यं दानींच इदमो दानीं प्रत्ययः काले इदानीं तदो दाच तदा तदानीं अनद्यतने र्हिलन्यतरस्यां कर्हि क
दा यर्हि यदा तर्हि तदा एतदः एत इत् एतौ रेफादौ थादौ च प्राग्दिशीये एतस्मिन्काले एतर्हि
प्रकारवचने थाल् प्रकारवृत्तिभ्यः किमादिभ्यः थाल् तेन प्रकारेण तथा यथा इदमस्थमुः थालोप
वादः एतदोपि वाच्यः अनेन एतेन वा प्रकारेण इत्थं किमश्च केन प्रकारेण कथं इति प्राग्दिशीयाः
अतिशायने तमबिष्ठनौ अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः अयमेषामतिशयेनाढ्यः आढ्यत
मः लघुतमो लघिष्ठः तिङश्च तिङंतादतिशये द्योत्ये तमप्स्यात् तरप्तमपौ घः किमेत्तिङव्ययघादा ५७

द्रव्यप्रकर्षे किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे किमेतदंतात्तिङोऽव्ययाच्च घयोः तदंतादाम् स्यात् न तु द्रव्यप्रकर्षे किंतमां प्राह्णेतमां पच
तितमां उच्चैस्तमां द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः द्विवचनविभज्योपपदे तरबीयसुनौ द्वयोरेकस्याति
शये विभक्तव्ये चोपपदे सति एतौ स्तः पूर्वयोरपवादः अयमनयोरतिशयेन लघुर्लघुतरः लघी
यान् उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः प्रशस्यस्य श्रः इष्ठेयसोः परतः प्रकृत्यैकाच् इष्ठादा
वेकाच् प्रकृत्या स्यात् श्रेष्ठः श्रेयान् ज्य च प्रशस्यस्य ज्यादेशः इष्ठेयसोः ज्येष्ठः ज्यादादीयसः आदेः
परस्य ज्यायान् बहोर्लोपो भू च बहोः बहोः परयोरिष्ठेयसोर्लोपः स्यात् बहोश्च भूरादेशः भूमा इष्ठस्य
यिट् च बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च भूयिष्ठः विन्मतोर्लुक् इष्ठेयसोः अतिशयेन स्रग्वी
स्रजिष्ठः स्रजीयान् अतिशयेन त्वग्वी त्वग्वान् त्वचिष्ठः ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ईष
दूनो विद्वान् विद्वत्कल्पः विद्वद्देश्यः विद्वद्देशीयः पचतिकल्पं विभाषा सुपो बहुच् पुरस्तात्तु ईष
दूनः पटुः बहुपटुः पटुकल्पः सुपः किं पचतिकल्पं प्रागिवात्कः इवे प्रतिकृतौ इवतः प्रागधि
कारः अव्ययसर्वनाम्नामकच् प्राक् टेः कापवादः अज्ञायतेवासायम्योऽश्वकः उच्चकैः नीचकैः सर्वके
कुत्सिते कुत्सितोऽश्वोऽश्वकः किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् अनयोः कतरो वैष्णवः यतरः ॥

ततरः वा बहूनां जातिपरिप्रश्ने डतमच् बहूनां मध्ये निर्धारणे डतमच् वा स्यात् जातिपरिप्रश्न इति प्रत्या
ख्यातमाकरे कतमो भवतां कठः यतमः ततमः वाग्रहणमकजार्थं यकः सकः इति प्राग्दिवीयाः इ
वे प्रतिकृतौ कंस्यात् अश्व इव प्रतिकृतिरश्वकः सर्वप्रातिपदिकेभ्यः स्वार्थे कन् अश्वकः तत्प्रकृतवचने म
यट् प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनं भावेऽधिकरणे वा ल्युट् आद्ये प्रकृतमन्नमन्नमयं
अपूपमयं द्वितीये अन्नमयो यज्ञः अन्नमयं पर्व प्रज्ञादिभ्यश्च अण् स्यात् प्राज्ञ एव प्राज्ञः दैवतः बां
धवः बह्वल्पार्थाच्छस्कारकादन्यतरस्यां बहूनि ददाति बहुशः अल्पशः आद्यादिभ्यस्तसेरुपसं
ख्यानं आदौ आदितः मध्यतः अंततः पृष्ठतः पार्श्वतः आकृतिगणोयं स्वरेण स्वरतो वर्णतः कृ
भ्वस्तियोगे सम्पद्यकर्तरि च्विः अभूततद्भाव इति वक्तव्यं विकारात्मतां प्राप्नुवंत्यां प्रकृतौ वर्तमाना
द्विकारशब्दात्स्वार्थे च्विः वा स्यात् करोत्यादिभिर्योगे अस्य च्वौ अवर्णस्य ईत् स्यात् च्वौ अकृष्णः कृष्णः सं
पद्यते तं करोति कृष्णीकरोति ब्रह्मीकरोति गंगीभवति अव्ययस्य च्वावीत्वं नेति वाच्यं दोषाभूतमहः
दिवाभूता रात्रिः विभाषा साति कार्त्स्न्ये च्विविषये साति वा स्यात्साकल्ये सात्पदाद्योः सस्य षत्वं न दधि
सिंचति कृत्स्नं शस्त्रमग्निः सम्पद्यते अग्निसाद्भवति च्वौ च दीर्घः स्यात् अग्नीभवति अव्यक्तानुकरणात्

ह्रेषु निवृत्तौ ह्रस्वतः प्राग् अधिकारः । जवरार्धादनितौ डाच् अजवर्णस्यानेकानन्तनोऽस्य न मतेकाजि
तियावत् नाहमसमर्थं यस्मात् तस्मात् डाच् स्यात् कृभ्वस्तिभिर्योगे डाचि बहुलं द्वे भवतः इति डाचि
वद्धिते द्वित्वं डाचि विवक्षिते द्वे इति परमसमर्थात् तस्मात् प्रत्ययः स्यात् डाचि कृते द्वित्वे सति द्व्य
जवरार्धत्वात् तस्मात् च सत्यां डाजिति वाभावः नित्यमाम्रेडिते डाचीति च वक्तव्यं डाच्परं यदाम्रे
डितं तस्मिन् परे पूर्वपरयोर्वर्णयोः पररूपं स्यात् इति तकारपकारयोः पकारः पटपटाक
रोति अव्यक्तानुकरणात् किं दृषत्करोति अजवरार्धात् किं श्रत्करोति अवरेति किं खरटख
रटाकरोति अनितौ किं पटिति करोति इति तद्धिताः ॥ अथ स्त्रीप्रत्ययाः अजा
द्यतष्टाप् अजादीनामकारान्तस्य वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् अजा एडका अश्वा च
टका मूषिका बाला वत्सा होडा मन्दा विलाता मेधा इत्यादि गंगा सर्वा ऋन्नेभ्यो कर्त्री दं
डिनी उगितश्च उगिदन्तात् नाम्नः स्त्रियां विवक्षितायां ङीप् भवन्ती पचन्ती उगिदचाम् इति सूत्रे च ग्रहणेन
धातोश्चेद् उगित्कार्यं तर्ह्यञ्चतेरेव नेतरस्य उखास्रत् पर्णध्वत् अञ्चेस्तु स्यादेव प्राची प्रतीची
टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः अनुपसर्जनं यत् टिदादि तदन्तं यदन्तं

ल॰ कौ॰ ५९

नोड्ङीप् कुरुचरी नदट् नदी देवट् देवी सौपर्णेयी ऐंद्री औत्सी ऊरुद्वयसी ऊरुदघ्नी ऊरुमात्री पं
चतयी आक्षिकी लावणिकी यादृशी इत्वरी नञ् स्नञ् ककञ् ख्युंस्तरुणतलुनानामुप स्त्रैणी पौं
स्नी शाक्तीकी आढ्यंकरणी तरुणी तलुनी यञश्च यञंतात् ङीप् अकारलोपे कृते हलस्त
द्धितस्य हलः परस्य तद्धितयकारस्य लोप ईति परे गार्गी प्राचां ष्फ तद्धितः यञंतात् ष्फो वा
स्यात् स च तद्धितः षिद्गौरादिभ्यश्च ङीष् स्यात् गार्ग्यायणी नर्तकी गौरी अनडुही अन
ड्वाही आकृतिगणोयं वयसि प्रथमे प्रथमवयोवाचिनोदंतात् ङीप् कुमारी द्विगोः अदंतात्
द्विगोर्ङीप् त्रिलोकी अजादित्वात् त्रिफला त्र्यनीका वर्णादनुदात्तात्तोपधात्तो नः वर्णवा
चीयोनुदात्तस्तोपधस्तदंतादनुपसर्जनाद्वा ङीप् तकारस्य नश्च एता एनी रोहिता रोहि
णी वोतो गुणवचनात् उदंताद्गुणवाचिनो वा ङीष् मृद्वी मृदुः बह्वादिभ्यश्च वा ङीष् बह्वी
बहुः कृदिकारादक्तिनः रात्रिः रात्री सर्वतोक्तिन्नर्थादित्येके शकटिः शकटी पुंयोगा
दाख्यायां या पुमाख्या पुंयोगात् स्त्रियां वर्तते ततो ङीष् गोपस्य स्त्री गोपी पालकांतान्न
गोपालिका अश्वपालिका प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः प्रत्ययस्थात्कात्पूर्व

स्याकारस्यैकारः स्यात् आपि सर्वाख्याः परेण चेत् सर्विका कारिका अतः किं नौका प्रत्ययस्था
त्किं शक्नोतीति शका अस्यपः किं बहुपरिव्राजका नगरी सूर्याद्देवतायां चाप् सूर्यस्य स्त्री दे
वता सूर्या देवतायां किं सूर्यागस्त्ययोश्छे च ङ्यां च यलोपः सूरी कुन्ती इन्द्रवरुणभवशर्वरुद्र
मृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ङीषश्च इन्द्रस्य स्त्री इन्द्राणी वरुणानी भवा
नी शर्वाणी रुद्राणी मृडानी हिमारण्ययोर्महत्त्वे महद्धिमं हिमानी महदरण्यमरण्या
नी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्यां यवनानां लिपिः यवनानी मातुलोपाध्याय
योरानुग्वा मातुलानी मातुली उपाध्यायानी उपाध्यायी आचार्याद्णत्वं च आचार्यानी
अर्यक्षत्रियाभ्यां वा स्वार्थे अर्याणी अर्या क्षत्रियाणी क्षत्रिया क्रीतात्करणपूर्वात् ङीप् व
स्त्रक्रीती क्वचिन्न धनक्रीता स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् असंयोगोपधं उपसर्जनं त
यत्स्वाङ्गं तदन्तात् ङीप् वा केशानतिक्रान्ता अतिकेशी अतिकेशा चन्द्रमुखी चन्द्रमुखा संयो
गोपधात्तु सुगुल्फा उपसर्जनात्किं सुशिखा नक्रोडादिबह्वचः क्रोडादेर्बह्वचो स्वाङ्गान्न ङीप्
कल्याणक्रोडा आकृतिगणोऽयं सुजघना नखमुखात्संज्ञायां न ङीप् पूर्वपदात्संज्ञायामगः

पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गकारव्यवधाने शूर्पणखा गौरमुखा
संज्ञायां किं ताम्रमुखी कन्या जातेरस्त्रीविषयादयोपधात् जातिवाचि यन्न च स्त्रियां नियतम
योपधं ततो ङीष् तटी वृषली कठी बह्वृची जातेः किं मुंडा अस्त्रीविषयात्किं बलाका अयोप
धात्किं क्षत्रिया योपधप्रतिषेधे गवयहयमुकयमत्स्यमनुष्याणामप्रतिषेधः गवयी हयी
मुकयी हलस्तद्धितस्येति यलोपः मनुषी मत्स्यस्य ङ्यांलोपः मत्सी इतो मनुष्यजाते ङीष्
स्यात् दाक्षी ऊङुतः उकारांतादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् कुरूः अयोपधात्
किं अध्वर्युः ब्राह्मणी पंगोश्च पंगूः श्वशुरस्योकाराकारलोपश्च श्वश्रूः ऊरूत्तरपदादौपम्ये उ
पमानवाचि पूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् करभोरूः संहितशफलक्षणवा
मादेश्च अनौपम्यार्थं सूत्रं संहितोरूः शफोरूः लक्षणोरूः वामोरूः शार्ङ्गरवाद्यञो ङी
न् शार्ङ्गरवादेरञोकारः तदंतात् जातिवाचिनो ङीन् स्यात् शार्ङ्गरवी ब्राह्मणी बैदी नृ
नरयोर्वृद्धिश्च नारी यूनस्तिः युवन् शब्दात् स्त्रियां तिः स्यात् युवतिः इति स्त्रीप्रत्ययाः सिद्धां
तकौमुदी शब्दकौस्तुभाभोगभोगानः चत्रीवरदराजः श्रीलघुसिद्धांतकौमुदी ॥ ॥ ६०